॥ श्रीरामः ॥

DICTIONARY DEPTT.
D.C.P. & R.I.
POONA 6.

श्रीमत्

# संगीतसुधाकरः ।

वे. पं. अपातुलस्युपाख्यकाशीनाथप्रणीतः ।

स च

पुण्यपत्तने

पं. विष्णुशर्मणा

D. C. P. R. INSTITUTE
LIBRARY.
POONA

आर्यभूषणाख्यमुद्रालये मुद्राक्षरैरंकयित्वा

प्राकाश्यं नीतः ।

शके १८३९ सन १९१७

( सर्वेऽधिकाराः स्वायत्तीकृताः )

अस्य ग्रन्थस्य मुद्रणे यद्धनमपेक्षितं तत्सकलमपि
श्रीमन्महीशूरयुवराजमहाशयैः 'सर के. नरसिंह-
राज वडियार जी. सी. आय्. ई.'
इति लक्षणांकितैः परमो-
दारचरितैरदायि ।

N82:6
15E7
24091

Printed at the Arya-Bhushan Press, Poona,
by Anant Vinayak Patwardhan.
AND
Published by Vishnu Narayan Bhatkhande B. A. LL. B.
at Walkeshwar-Bombay.

श्रीरामः

# संगीतसुधाकरः ।

## मङ्गलाचरणम् ।

श्रीगणेशाय नमः ।

यः कालत्रयसाक्ष्यनंतविभवः पूर्णो जगद्व्यापको ।
नित्यं श्रुत्यनुगीतनिर्मलगुणग्रामः स्वतो राजते ॥
चेतो वृत्त्यनुरंजको घनलसद्वर्णः सदानंददः ।
सर्वालंकृतिभिर्विराजिततनुस्तं जानकीशं भजे ॥ १ ॥

## प्रथमस्तबकः ।

अपातुलस्युपाख्येन परळीक्षेत्रवासिना ।
काशीनाथेन संगीतसुधाकर उदीर्यते ॥ २ ॥
गीतवादित्रनृत्यानां त्रयं संगीतमुच्यते ।
प्राधान्यात्तत्र गीतस्य तत्संगीतमितीरितम् ॥ ३ ॥
सामवेदात्संगृहीतं संगीतं ब्रह्मणा पुरा ।
भरतादिभ्य आख्यातं तैः प्रयुक्तं शिवाग्रतः ॥ ४ ॥
षड्जादिस्वरसंपन्नं जगदानंदकारकम् ।
आदृतं देवगन्धर्वयक्षदानवमानवैः ॥ ५ ॥
हरिणोऽपि वशं याति रुदन्बालोऽपि तुष्यति ।
कृष्णसर्पोऽपि यच्छ्रुत्वा मुदांदोलयते शिरः ॥ ६ ॥
यच्च वेदेषु विहितं गायेतां ब्राह्मणाविति ।
तत्संगीतस्य माहात्म्यं को वा वर्णयितुं क्षमः ॥ ७ ॥
मार्गदेशिप्रकाराभ्यां गीतं द्वेधा समीरितम् ।
अनादिसंप्रदायं यन्नियताभ्युदयप्रदम् ॥ ८ ॥

शास्त्रोक्तसर्वनियमैः संपन्नं तदकृत्रिमम् ।
मार्गगीतं पुरैवासीत्प्रयुक्तं भरतादिभिः ॥ ९ ॥
अधुना गीयते यच्चानियतं कामचारतः ।
देशे देशे प्रचरितं तत्सर्वं देशिसंमतम् ॥ १० ॥
तदपि द्विविधं ज्ञेयं दक्षिणोत्तरभेदतः ।
कर्णाटकं दक्षिणे स्याद्धिंदुस्थानि तथोत्तरे ॥ ११ ॥
हिंदुस्थानिप्रसिद्धं यद्गीतं तत्र यथाश्रुतम् ।
स्वररागादि यत्किंचिदस्मिन्ग्रंथे विविच्यते ॥ १२ ॥

उद्देशः ।

सुधाकरेऽस्मिन्प्रथमं नादस्योत्पत्तिरीरिता ।
ततो हृत्कंठमूर्धस्थनाडीभ्यः श्रुतिवर्णनम् ॥ १३ ॥
ततः सप्तस्वरास्तेषु श्रुतिसंख्याव्यवस्थितिः ।
विकृताविकृतत्वे च तीव्रकोमलते ततः ॥ १४ ॥
च्युताच्युतादिभेदेन स्वरसंख्याविनिर्णयः ।
पूर्वग्रंथगताः संज्ञास्ततो वाद्यादिलक्षणम् ॥ १५ ॥
ग्रामास्ततो मूर्छनाश्च तत्संख्या च ततः परम् ।
वर्णालंकृतयो जातिगीतयो गमकास्ततः ॥ १६ ॥
आलापलक्षणं गातुर्गुणदोषानुदर्शनम् ।
द्वितीयस्तबके रागलक्षणानि ततः परम् ॥ १७ ॥
अधिकं पंचविंशत्या शतं रागाः प्रकीर्तिताः ।
आलक्ष्य लक्ष्यसंगीतमेवमत्रार्थसंग्रहः ॥ १८ ॥

नादोत्पत्तिः ।

आत्मबुद्धिमनोवह्निप्राणसंबंधसंभवः ।
आहतोऽनाहतश्चेति द्विविधो नाद उच्यते ॥ १९ ॥
तत्रानाहतनादस्तु योगिभिः समुपासितः ।
गुरूपदिष्टमार्गेण मुक्तिदः स न रंजकः ॥ २० ॥

आहतो गीतवाद्येषु रंजको दुःखभंजकः ।
श्रुतिस्वरादिरूपोऽसौ गीतस्यात्मैव केवलम् ॥ २१ ॥

श्रुतिस्वरादिव्यवस्था ।

हृदि द्वाविंशतिर्नाड्यस्तिरश्च्यः पवनाहताः ।
एवं कंठे मूर्ध्नि ताभ्यस्तावत्यः श्रुतयोऽभवन् ॥ २२ ॥
ताभ्योऽभवन्स्वराः षड्जर्षभगांधारमध्यमाः ।
पंचमो धैवतश्चैव निषाद इति सप्त ते ॥ २३ ॥
तेषां संज्ञाः सरिगमपधनीत्यपरा मताः ।
संक्षिप्ताः स्वीकृतास्तज्ज्ञैः प्रयोगेषूपयोजिताः ॥ २४ ॥
श्रुतयः स्युः स्वराभिन्नाः श्रावणत्वेन हेतुना ।
अहिकुंडलवत्तत्र भेदोक्तिः शास्त्रसंमता ॥ २५ ॥
श्रुत्यनंतरसंभूतः स्निग्धोऽनुरणनात्मकः ।
श्रोतृस्वांतं रंजयति स्वतो वा राजते स्वरः ॥ २६ ॥
स मंद्रमध्यताराख्यः क्रमतो द्विगुणोत्तरः ।
हृदि मंद्रो गले मध्यो मूर्ध्नि तार इति त्रिधा ॥ २७ ॥
चतुःश्रुतियुतः षड्जो मध्यमः पंचमस्तथा ।
रिधौ त्रिश्रुतिकौ प्रोक्तौ गनी द्विश्रुतिकौ क्रमात् ॥२८॥
तीव्रा कुमुद्वती मंदा छंदोवत्यपि षड्जगा ।
दयावती रंजनी च रक्तिका चर्षभास्थिता ॥ २९ ॥
रौद्री क्रोधा च गांधारे वज्रिका च प्रसारिणी ।
प्रीतिश्च मार्जनी चैव मध्यमस्वरमाश्रिता ॥ ३० ॥
क्षिती रक्ता च संदीपिन्यालापिन्यापि पंचमे ।
मदंती रोहिणी रम्या धैवतस्वरसंश्रिता ॥ ३१ ॥
उग्रा च क्षोभिणीति द्वे निषादे स्त इति क्रमः ।
एते शुद्धस्वराः सप्त स्वस्वांत्यश्रुतिसंस्थिताः ॥ ३२ ॥
स्वराः स्वनियतश्रुत्याः प्रच्युता विकृताः स्मृताः ।
सपावविकृतावन्ये विकृताः पंच कीर्तिताः ॥ ३३ ॥

स्वोत्तरश्रुतिगामी चेत्स्वरस्तीव्राभिधो भवेत् ।
स्वपूर्वश्रुतिगामी चेत्स्वरः कोमलसंज्ञकः ॥ ३४ ॥
मध्ये तु षड्जर्षभयोः संस्थितः कोमलर्षभः ।
गांधारो रिगयोर्मध्ये संस्थितः कोमलो मतः ॥ ३५ ॥
मपयोरंतरे तीव्रमध्यमः समुदीरितः ।
पधयोरंतरे चैवं स्थितः कोमलधैवतः ॥ ३६ ॥
धनिमध्ये कोमलश्च निषादः परिकीर्तितः ।
पंचैते विकृताः सप्तशुद्धास्ते द्वादश स्मृताः ॥ ३७ ॥

स्वरसंख्याविनिर्णयः ।

रत्नाकरमते प्रोक्ताः सप्तापि विकृताः स्वराः ।
च्युताच्युतादिभेदेन तत्संख्यैकोनविंशतिः ॥ ३८ ॥
स्वराश्चतुर्दशैवोक्ताः स्वरमेलकलानिधौ ।
तेष्वेवान्तर्भावितास्ते पंच रत्नाकरस्वराः ॥ ३९ ॥
एवं रागविबोधेऽपि प्रोक्ताः पंचदश स्वराः ।
तथा द्वादश संगीतसारामृतकृतोदिताः ॥ ४० ॥
संगीतपारिजाते ते एकोनत्रिंशदीरिताः ।
द्वादशैव स्वरान्वष्टि चतुर्दंडिप्रकाशिका ॥ ४१ ॥
स्वराणां विषये ग्रंथेष्वेवं विप्रातिपत्तयः ।
संति कर्णाटकीयानां विचारस्तत्र युज्यते ॥ ४२ ॥
हिंदुस्थानिमते तावत्कृतो लक्ष्यानुसारतः ।
स्वराः पंचैव विकृताः शुद्धाः सप्तेतिनिर्णयः ॥ ४३ ॥

पूर्वग्रंथगतविकृतस्वरसंज्ञाः ।

पूर्वग्रंथगताः संज्ञा विकृतानां प्रदर्शये ।
येन तद्गतरागाणां धीरनायासतो भवेत् ॥ ४४ ॥
अस्मत्तीव्ररिधौ ग्रंथेषूक्तौ शुद्धौ गनीक्रमात् ।
तयोरेव ग्रंथसंज्ञा पंचश्रुतिरिधाविति ॥ ४५ ॥

अस्मत्कोमलगांधारो ग्रंथे साधारणः स्मृतः ।
स एव षट्श्रुतीरिश्च पूर्वग्रंथेषु कथ्यते ॥ ४६ ॥
यश्चास्मत्तीव्रगांधारः स ग्रंथेष्वंतराभिधः ।
अस्मत्तीव्रो मध्यमस्तु ग्रंथेषु प्रतिमः स्मृतः ॥ ४७ ॥
स एव हि वराळीमः कैशिकी मृदुपंचमः ।
निषादः कोमलोऽस्माकं ग्रंथे कैशिक उच्यते ॥ ४८ ॥
स एव षट्श्रुतिर्धश्च ग्रंथेषु प्रतिपाद्यते ।
अस्मत्तीव्रनिषादस्तु तेषां भवति काकली ॥ ४९ ॥
स एव मृदुषड्जश्च ग्रंथेषु प्रोच्यते क्वचित् ।
प्राचीनरागज्ञानार्थमेताः संज्ञाः प्रदर्शिताः ॥ ५० ॥
हिंदुस्थानिमतेऽस्मिंस्तु तीव्रकोमलभेदतः ।
विज्ञायंते स्वराः सर्वे तत्र नैतत्प्रयोजनम् ॥ ५१ ॥

वादिसंवाद्यादिलक्षणम् ।

स्वराः प्रोक्ता वादिसंवाद्यनुवादिविवादिनः ।
तत्र वादी तु मुख्यः स्याद्बहुशो यः प्रयुज्यते ॥ ५२ ॥
द्वादश श्रुतयोऽष्टौ वा ययोरंतरगोचराः ।
मिथः संवादिनौ तौ स्तः शेषाः स्युरनुवादिनः ॥ ५३ ॥
विवादी तु भवेद्वर्ज्यो रक्तिविच्छेदकारकः ।
रिधयोर्वा तौ तयोर्वा निगावन्यविवादिनौ ॥ ५४ ॥
वादी रागे भवेद्राजा मंत्री संवाद्युदीरितः ।
अनुवादी स्मृतो भृत्यो विवादी शत्रुरुच्यते ॥ ५५ ॥
कुशलास्तु क्वचिद्रागे विवादिनमपि स्वरम् ।
मनाक् स्पृशन्ति न च तद्दोशिदृष्ट्या विगर्हितम् ॥ ५६ ॥
वादीत्ववश्यं द्रष्टव्यो यस्माद्रागे सुरागता ।
जीवस्वरः स रागाणां स एवांशः प्रकीर्तितः ॥ ५७ ॥
मयूरचातकच्छागक्रौंचकोकिलवाजिनः ।
गजश्च सप्त षड्जादीन्क्रमादुच्चारयत्यमी ॥ ५८ ॥

## ग्रामाः ।

ग्रामास्त्रयः स्युर्विशिष्टस्वरसंदोहरूपिणः ।
षड्जमध्यमगांधारसंज्ञका मूर्छनाश्रयाः ॥ ५९ ॥
षड्जग्रामे मताः सप्त यथोक्तश्रुतिकाः स्वराः ।
स एवाद्य प्रचरति सर्वरागसमाश्रयः ॥ ६० ॥
मध्यमग्रामरागाणां प्रचारो नात्र दृश्यते ।
तस्मादस्मिन्मते षड्जग्रामः स्यादेक एव हि ॥ ६१ ॥
स्वर्गं गतो हि गांधारग्रामो नेहेति निश्चयः ।
तथैव मध्यमग्रामो मन्ये देशान्तरं गतः ॥ ६२ ॥

## मूर्छनाः ।

सप्तस्वरक्रमारोहावरोहौ मूर्छनोदिता ।
ताश्च प्रोक्ताः प्रतिग्रामं सप्तसंख्या मुनीश्वरैः ॥ ६३ ॥
मध्यस्थषड्जमारभ्य प्रथमा मूर्छना मता ।
अधस्तननिषादादीनारभ्यान्याः षडीरिताः ॥ ६४ ॥
अन्ये तु षड्जस्थानस्थैर्न्याद्यैः षण्मूर्छना जगुः ।
तन्मते सर्वरागाणां मेला एव हि मूर्छनाः ॥ ६५ ॥
रत्नाकरादिग्रंथेषु मूर्छनाजातिदर्शिताः ।
रागाः सर्वे रहस्यं तन्मतं प्राक् सर्वसंमतम् ॥ ६६ ॥
हिंदुस्थानिमते तावद्रागरूपप्रदर्शनम् ।
तीव्रकोमलसंज्ञाभिः स्वराणां परिकल्पितम् ॥ ६७ ॥
यास्तु षड्जग्रामगता मूर्छनाः सप्त कीर्तिताः ।
परिज्ञानार्थमेतासां संज्ञा अपि पृथङ्मताः ॥ ६८ ॥
प्रथमोत्तरमंद्रा स्याद्रजनी चोत्तरायता ।
शुद्धषड्जा मत्सरीकृदश्वक्रांताभिरुद्गता ॥ ६९ ॥
ताः पुनस्त्रिविधा पूर्णाः षाडवाश्च तथौडुवाः ।
पूर्णाः सप्तस्वरोपेताः षाडवाः षड्स्वरैर्युताः ॥ ७० ॥

पंचस्वरैरौडुवाः स्युरेवं त्रैविध्यमीरितम् ।
आरोहणावरोहाभ्यां तद्भेदा नव कीर्तिताः ॥ ७१ ॥
पूर्णारोहावरोहस्तु प्रथमो भेद ईरितः ।
द्वितीयः पूर्ण आरोहेऽवरोहे षाडवो मतः ॥ ७२ ॥
तृतीयः पूर्ण आरोहेऽवरोहे त्वौडुवो भवेत् ।
आरोहे षाडवः पूर्णोऽवरोहे स्याच्चतुर्थकः ॥ ७३ ॥
आरोहे चावरोहे च षाडवः पंचमः स्मृतः ।
षष्ठः षाडव आरोहेऽवरोहे त्वौडुवो भवेत् ॥ ७४ ॥
आरोह औडुवः पूर्णोऽवरोहे सप्तमो मतः ।
प्रोक्तश्चौडुव आरोहेऽवरोहे षाडवोऽष्टमः ॥ ७५ ॥
आरोहे चावरोहे स्यादौडुवो नवमः खलु ।
अथैषां नवभेदानां भेदान्वक्ष्ये क्रमात्पुनः ॥ ७६ ॥
प्रथमस्त्वेक एव स्यात्षड्भेदाः स्युर्द्वितीयके ।
तृतीये स्युः पंचदश चतुर्थे तु षडेव हि ॥ ७७ ॥
षट्त्रिंशत्पंचमे भेदाः षष्ठे नवतिरीरिताः ।
सप्तमे स्युः पंचदश भेदा नवतिरष्टमे ॥ ७८ ॥
भेदाः स्युर्नवमे भेदे द्वेशते पंचविंशतिः ।
मिलितास्ते चतुरशीत्यधिकं तु चतुःशतम् ॥ ७९ ॥
एकद्वित्रिचतुःपंचषट्सप्तस्वरमूर्छनाः ।
प्रोक्ताः पंचसहस्राणि तथा नवशतानि च ॥ ८० ॥
त्रयोदश पुनस्त्वेवं भेदाः स्युः प्रतिमूर्छनम् ।
स्वराणां विकृतत्वे च पुनः संति सहस्रशः ॥ ८१ ॥
लक्ष्यत्रयं सप्तदशसहस्राणि शतानि च ।
नवत्रिंशन्मूर्छनानां भेदा रत्नाकरे कृताः ॥ ८२ ॥
सूक्ष्मदृष्ट्या तदप्यल्पमिति संख्यावतां मतम् ।
वस्तुतो मूर्छनानंत्यमेव सर्वत्र संमतम् ॥ ८३ ॥

वर्णाः ।

गानक्रियां वर्णमाहुः स चतुर्विध उच्यते ।
स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् ॥ ८४ ॥
स्थित्वाऽस्थित्वैकस्वरस्य प्रयोगे स्थाय्युदीरितः ।
अन्यावन्वर्थसंज्ञौ तन्मिश्रः संचारिसंज्ञकः ॥ ८५ ॥

अलंकाराः ।

विशिष्टवर्णसंदर्भमलंकारं प्रचक्षते ।
एकैकमूर्छनायां तत्प्रकारा बहवो मताः ॥ ८६ ॥
अलंकारानलंकाराभिधान्वक्ष्ये समासतः ।
गीते ताले चोपयुक्तान्नवानिह दश क्रमात् ॥ ८७ ॥
सुवर्णो मौक्तिको हीरः कुंडलः कंकणोऽगदः ।
तार्टको नूपुरो रत्नं हारोऽलंकृतयो दश ॥ ८८ ॥
प्रथमं च द्वितीयं च द्विरुच्चार्य ततो गमौ ।
सुवर्णः षट्स्वरोपेतकलाभिः पंचभिर्मतः ॥ ८९ ॥
ससरिरिगम रिरिगगमप गगममपध ममपपधनि
पपधधनिस ।
सपौ रिधौ गनी चैव मसाविति चतसृभिः ।
द्विस्वराभिः कलाभिः स्यादलंकारस्तु मौक्तिकः॥ ९०
सप रिध गनि मस ।
सरी सगौ समौ चैव पुनरुक्तौ सगौ समौ ॥
दशस्वराः कलाः पंच हीरालंकार ऊचिरे ॥ ९१ ॥
सरिसगसमसगसम रिगारिमरिपरिमरिप गमग
पगधगपगध मपमधमानिमधमानि पधपनिपसपनिप
सरी गरी सरी चैव ततः सरिगमा गरी ।
कुंडलालंकृतौ पंच कलाः स्युर्द्वादशस्वराः ॥ ९२ ॥
सरिगरिसरिसरिगमगरि रिगमगारिगारिगमपमग ग-
मपमगमगमपधपम मपधपमपमपधनिधप पध-
निधपधपधनिसनिध ।

सद्वयं रित्रयं सोऽथरिद्वयं सरिगास्तथा ।
रिगमाः कंकणे पंच कलाश्चतुर्दशस्वराः ॥ १३ ॥
ससरिरिरिसरिरिसरिगारिगम रिरिगगगरिगगरिग-
मगमप गगममममगममगमपमपध ममपपपमपपम-
पधपधनि पपधधधपधधपधनिधनिस ।
सरी सरी गरी सौरी सौरी गौ षोडशस्वराः ।
षट्र कलाः प्रवदंत्यस्मिन्नलंकारेंऽगदे बुधाः ॥ १४ ॥
सरिसरिगरिससरिरिससरिरिगग रिगरिगमगरिरि-
गगरिरिगगमम गमगमपमगगममगगममपप मप-
मपधपममपपममपपधध पधपधनिधपपधधपप-
धधनिनि धनिधनिसनिधधनिनिधधनिनिसस ।
सगौ रिमौ गरी चैव सरी सगरिगाः समौ ।
समगा रिगसाः पंच कलाः स्युर्विंशतिस्वराः ।
यस्मिन्नसावलंकारस्ताटंकः कथितो बुधैः ॥ १५ ॥
सगरिमगरिससरिसगरिगसमसमगरिगम रिमरिप-
मगरिगरिमगमरिपरिपमगमप गपगधपमगमगप-
मपगधगधपमपध मधमनिधपमपमधपधमनिम-
निधपधनि पनिपसनिधपधपनिधनिपसपसनिधनिस ।
सो मत्रयं च समसा रिद्वयं गद्वयं च मः ।
सरिगा ममगा रिश्च सद्वयं रिगमास्तथा ।
नूपरे तु कलाः पंच स्युश्चतुर्विंशतिस्वराः ॥ १६ ॥
सममससमसरिरिगगमसरिगममगरिससरिगम रिप-
पपरिपरिगगममपरिगमपपमगरिरिगमप गधधधगध-
गममपपधगमपधधपमगगमपध मनिनिनिमनिमप-
पधधनिमपधनिनिधपममपधनि पससससपसपध-
धनिनिसपधनिससनिधपपधनिस ।
सरिगा मपमाश्चैव गरिसा गरिमा गपौ ।

मगौ रिगौ च सरिसा रिगमा रिगमाश्च पः ।
कलाश्चतस्रो रत्नालंकारेऽष्टाविंशतिस्वराः ॥ ९७ ॥
सरिगमपमगारिसगारिमगपमगारिगसरिसरिगमरिग-
मप रिगमपधपमगारिमगपमधपमगमारिगारिगमपग-
मपध गमपधानिधपमगपमधपनिधपमपगमगमपध-
मपधानि मपधानिसानिधपमधपानिधसानिधपधमपम-
पधनिपधनिस ।
सरिगमसरिगमसरिसरिसरिगमसरिगसरिगसरिस-
सरिरिगैः ।
गममैरुक्तः पंच द्वात्रिंशत्स्वरकलाभिरिह हारः ॥ ९८ ॥
सरिगमसारिसरिगमसरिसरिगमसरिगसरिगस-
रिससरिरिगगमम रिगमपारिगमपारिगारिगारिगमप-
रिगमरिगमरिगारिरिगगमभपपगमपधगमपधगम -
गमगमपधगमपगमपगमगगममपपधध मपधनि-
मपधनिमपमपमपपानिममधमपधमपममपपधधानि-
नि पधनिसपधानिसपधपधपधनिसपधानिपधनिप-
धपपधधनिनिसस ।
दशात्रैवमलंकाराः संचारिण उदाहृताः ।
आरोहेणावरोहेण गेयाः सर्वे मनीषिभिः ॥ ९९ ॥
अलंकारैः स्वरज्ञानं रक्तिर्गीतिविचित्रता ।
सर्वरागेषु विस्तारः कर्तुं शक्यो भवेद्ध्रुवम् ॥ १०० ॥

## जातयः ।

अथ जातय उच्यंते शुद्धाश्च विकृतास्तथा ।
षाड्ज्यार्षभी च गांधारी मध्यमा पंचमी तथा ॥ १ ॥
धैवती चैव नैषादी शुद्धाः स्युः सप्त जातयः ।
यासां नामस्वरो न्यासोऽपन्यासोंऽशो ग्रहस्तथा ॥ २ ॥

तारन्यासविहीनाश्च पूर्णाः स्युः शुद्धजातयः ।
एतल्लक्षणहीनास्तु भवंति विकृता अपि ॥ ३ ॥

गीतयः ।

गीतयः स्युः पंच शुद्धा भिन्ना गौडी च वेसरा ।
साधारणी च शुद्धा स्यादवक्रैर्ललितैः स्वरैः ॥ ४ ॥
भिन्ना सूक्ष्मस्वरैर्वक्रैर्मधुरैर्गमकैर्युता ।
गाढैस्त्रिस्थानगमकैरुहाटीललितैः स्वरैः ॥ ५ ॥
अखंडितगतिः स्थानत्रये गौडी सतां मता ।
वेगवद्भिः स्वरैर्वर्णचतुष्केऽप्यतिरक्तितः ॥ ६ ॥
वेगस्वरा नाम गीतिर्वेसरेत्युच्यते बुधैः ।
चतुर्गीतिगतं लक्ष्माश्रिता साधारणी मता ।
शुद्धादिगीतियोगेन रागाः शुद्धादयो मताः ॥ ७ ॥

गमकाः ।

गमकः स्वरकंपः स्याच्छ्रोतृचित्तसुखावहः ।
अनेकधा स कथितः संक्षेपाद्दशधोच्यते ॥ ८ ॥
तिरिपः स्फुरितो लीनांदोलितौ वलिराहतः ।
उल्लासितो हुंफितश्च घर्षणो मिश्रितो दश ॥ ९ ॥
तिरिपो द्रुततुर्यांशवेगकंप उदीर्यते ।
द्रुतार्धवेगः स्फुरितो लीनस्तु द्रुतवेगवान् ॥ ११० ॥
आंदोलितो लघुजवो वलिर्विविधवक्रगः ।
स्वरमग्रगमाहत्य निवृत्तश्चाहतः स्मृतः ॥ ११ ॥
उल्लासितः क्रमादूर्ध्वच्छेद्यः स्वरानुत्तरोत्तरान् ।
हृदयंगमहुंकारगंभीरो हुंफितो मतः ॥ १२ ॥
एकास्फालनतोऽनेकस्वराकर्षी च घर्षणः ।
अन्येषां मिश्रणाच्चैव मिश्रितः स्यादनेकधा ॥ १३ ॥

आलापः ।

ग्रहांशमंद्रताराणां न्यासापन्यासयोस्तथा ।
अल्पत्वस्य बहुत्वस्य षाडवौडुवयोरपि ॥ १४ ॥
अभिव्यक्तिर्यत्र भवत्यालापः स उदीरितः ।
द्विधा स रागालापश्च रूपकालाप एव च ॥ १५ ॥
रागालापः स विज्ञेयो योऽनपेक्ष्यैव रूपकम् ।
स्वस्थानकैश्चतुर्भिः स्यादिति गीतविदो विदुः ॥ १६
रूपकं तु सतालं स्यात्पृथक्भूतविदारिकम् ।
तथैव रूपकालापः स्वस्थानेषु चतुर्षु हि ॥ १७ ॥
अविरम्यैव प्रवृत्तो योऽपन्यासस्वरेषु हि ।
एकाकारः स वै रागालापः स्यादविदारिकः ॥ १८ ॥
यो विरम्य विरम्यैव न्यासापन्यासकेषु च ।
प्रवृत्तो रूपकालापः स विशेषः पुनर्द्विधा ॥ १९ ॥
रूपकावयवानां हि भंजकः प्रथमो मतः ।
समग्ररूपकस्यैव भंजकः स्याद्द्वितीयकः ॥ १२० ॥
अंशाच्चतुर्थो द्व्यर्धः स्यादष्टमो द्विगुणः स्मृतः ।
द्व्यर्धादधस्तु प्रथमं सद्व्यर्धं स्याद्द्वितीयकम् ॥ २१ ॥
द्विगुणाधस्तृतीयं स्यात्तुर्यं सद्विगुणं भवेत् ।
स्थानान्येतानि चत्वारि मतान्यालापकोविदैः ॥ २२
प्रतिस्थानं चालयित्वा स्वरांस्तत्तद्गतान्पृथक् ।
रागस्यांशे भवेन्न्यास आलापे द्विविधेऽपि च ॥ २३
स्तोकस्तोकैस्तथास्थायैः प्रसन्नैर्बहुभंगिभिः ।
जिवस्वरव्याप्तिमुख्यै रागस्य स्थापना भवेत् ॥ २४

सुगायकः ।

अभ्यासशीलः स्वायत्तकंठो लयविचक्षणः ।
रागरागांगतत्त्वज्ञः प्रबंधालप्तिकोविदः ॥ २५ ॥
त्रिस्थानप्रोक्तगमकेष्वनायासलसद्गतिः ।
जितश्रमस्तालकलाप्रगल्भो ग्रहमोक्षवित् ॥ २६ ॥

सुसंप्रदायः सुघटः प्रभूतप्रतिभान्वितः ।
अदभ्रस्थायसंचारः श्रोतृचित्तानुरंजकः ॥ २७ ॥
गंभीरमधुरध्वानः सर्वकाकुविशेषवित् ।
सावधानः सुशारीरः सर्वदोषविवर्जितः ॥ २८ ॥
श्लक्ष्णसुस्निग्धमधुरगीतातिशयकौशलः ।
गायकाग्रेसरः प्रोक्तो निर्गर्वो धारणापटुः ॥ २९ ॥

दुर्गायकः ।

कंपितः शंकितो भीतः संदष्टोद्घृष्टझोंबकाः ।
सूत्कारी विकलः काकी कराली विनिमीलकः ॥१३०॥
वितालः करभो वक्री विरसः सानुनासिकः ॥
उद्वडो मिश्रकोऽव्यक्तः स्थानभ्रष्टोऽव्यवस्थितः ॥ ३१ ॥
अपस्वरः प्रसारी च तुंबक्यनवधानकः ।
इत्येते निंदिता लोके गायकाः पंचविंशतिः ॥ ३२ ॥
स्वभावतो गात्रशब्दकंपनात्कंपितो मतः ।
शंकितस्त्वरया गाता भीतस्तु भयसंयुतः ॥ ३३ ॥
गायन्संदश्य दशनान्संदष्टः परिकीर्तितः ।
विरसोद्घोष उद्घृष्टः शिरालमुखकंधरः ॥ ३४ ॥
झोंबकः कथितो गीते सूत्कारी सूत्कृतैर्मुहुः ।
विकलः प्रोच्यते गायन्स्वरान्न्यूनाधिकश्रुतीन् ॥ ३५ ॥
काकक्रूररवः काकी करालोद्घाटिताननः ।
कराली स्यान्मिलच्चक्षुरुदितो विनिमीलकः ॥ ३६ ॥
तालच्युतो वितालः स्यात्करभस्तूर्ध्वकंधरः ।
वक्रीकृतगलो वक्री विरसो रसवर्जितः ॥ ३७ ॥
गेयं नासिकया गायन्नुच्यते सानुनासिकः ।
छागवद्वदनं कुर्वन्नुद्वडोऽधमगायनः ॥ ३८ ॥
शुद्धच्छायालगौ रागौ मिश्रयन्मिश्रकः स्मृतः ।
अस्पष्टवर्णस्त्वव्यक्तः स्थानभ्रष्टस्तु गायकः ॥ ३९ ॥

स्थानत्रये योऽभिगंतुमशक्तः कंठतो भवेत् ।
स्थानकेष्वव्यवस्थित्या कथ्यते चाव्यवस्थितः ॥ १४० ॥
अपस्वरस्तु रागेषु वर्जितस्वरगानतः ।
प्रसारी स च विज्ञेयो गीते गात्रप्रसारणात् ॥ ४१ ॥
तुंबकी स्यात्तुंबकवद्गीते प्रोत्फुल्लगल्लकः ।
स्थायादिष्ववधानेन रहितोऽनवधानकः ॥ ४२ ॥
एवं व्युत्पादिताः पंचविंशतिः कंपितादयः ।
एतैर्दोषैरसंस्पृष्टः संमतो गायकाग्रणीः ॥ ४३ ॥

शारीरम् ।

अनभ्यासेपि रागाभिव्यक्तिशक्तिस्तु या ध्वनेः ।
तच्छारीरं विदुर्यस्माच्छरीरेण सहोद्भवेत् ॥ ४४ ॥
घनता स्निग्धताकांतिरक्तिमाधुर्यमार्दवैः ।
गांभीर्यादिगुणैर्युक्तं तत्सुशारीरमीरितम् ॥ ४५ ॥
निःसारतापस्वरताकार्श्यकार्कश्यरुक्षता ।
रक्तिहीनत्वमित्याद्यैः कुशारीरं तु दुर्गुणैः ॥ ४६ ॥
विद्यादानेन तपसा भक्त्या वा जानकीपतेः ।
प्रभूतभाग्यविभवैः सुशारीरमवाप्यते ॥ ४७ ॥
इत्थं स्वरप्रकरणं संक्षेपात्समुदीरितम् ।
रागप्रकरणं चेतःपरं व्यक्तमुदीर्यते ॥ १४८ ॥

इतिस्वरप्रकरणं संपूर्णम् ।
श्रीसीतारामचंद्रचरणारविंदार्पणमस्तु ।
॥ शुभम् ॥

श्रीरामः ।

# संगीतसुधाकरः ।

## द्वितीयस्तबकः ।

### अथरागप्रकरणम् ।

स्वरवर्णविशिष्टेन ध्वनिभेदेन येन वै ।
रज्यंते जनचेतांसि स रागः संमतः सताम् ॥ १ ॥
रंजयंतीतिवा रागा दशलक्षणलक्षिताः ।
अतस्तेषां प्रसिद्धानि लक्षणानि दश ब्रुवे ॥ २ ॥
ग्रहांशमंद्रताराश्च बहुत्वं चाल्पता तथा ।
न्यासापन्याससंन्यासाविन्यासा इति वै दश ॥ ३ ॥
रागारंभे प्रयुक्तो यः स्वरः स ग्रह उच्यते ।
अंशो जीवस्वरो यो हि प्रयोगे बहुलः स्मृतः ४ ॥
अंशान्मंद्रस्थितान्नीचैरामंद्रस्थांशमाव्रजेत् ।
आमंद्रन्यासमथवा तदधःस्थरिधावपि ।
सीमामंद्रगतेरेषा ततोर्वाक्कामचारिता ॥ ५ ॥
मध्यमे सप्तकेंशः स्यात्तस्मात्तारास्थितात्परान् ।
स्वरांश्चतुर आरोहेदेष तारावधिः स्मृतः ।
अर्वाक् तु कामचारः स्यात्तारे लुप्तोऽपि गण्यते ॥ ६ ॥
बहुत्वं द्विविधं प्रोक्तमभ्यासात्तद्लंघनात् ।
अनभ्यासाल्लंघनाच्च द्विविधैवाल्पता मता ॥ ७ ॥
सातत्याद्यवधानाद्वा स्वरोच्चारः पुनः पुनः ।
अभ्यासः कथ्यते गीतेऽनभ्यासस्तद्विपर्ययः ॥ ८ ॥

स्वरस्यास्पर्शनं यत्तु लंघनं तत्प्रकीर्तितम् ।
साकल्येन स्वरस्पर्शस्त्वलंघनमिति स्मृतम् ॥ ९ ॥
न्यासस्वरः स विज्ञेयः सर्वगीतसमाप्तिकृत् ।
अपन्यासः स विज्ञेयः गीतिखंडसमाप्तिकृत् ॥ १० ॥
संन्यासः कथितो गीत आद्यखंडसमाप्तिकृत् ।
विन्यासः स्यादाद्यखंडावयवस्य समाप्तिकृत् ॥ ११ ॥
मार्गगीते पुरैवासीदेतल्लक्षणगौरवम् ।
अधुना देशिगीते तु दृश्यते क्वचन क्वचित् ॥ १२ ॥
प्रथितानि पुनस्त्रीणि रागाणां लक्षणानि हि ।
संपूर्णत्वं षाडवत्वमौडुवत्वं च सर्वदा ॥ १३ ॥
संपूर्णः सप्तभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः ।
औडुवः पंचभिर्ज्ञेयो राग एतदिह स्फुटम् ॥ १४ ॥
सूर्योदयं समारभ्य पुनः सूर्योदयावधि ।
सुधाकरेऽस्मिन्ये रागास्तत्संज्ञाः क्रमतो ब्रुवे ॥ १५ ॥

रागोद्देशः ।

भैरवः प्रथमो रागस्ततो बंगालभैरवः ।
आनंदभैरवस्तस्माच्छिवभैरव ईरितः ॥ १६ ॥
ततः सोराष्ट्राभिधेयः स्ततो रामकलिः स्मृतः ।
ततो गुणकलिश्चैव ततोऽहीरी प्रकीर्तिता ॥ १७ ॥
योगिनी च बिभासश्च ततो वेलावलीरिता ।
शुक्लवेलावली चैव यमनीपूर्विका ततः ॥ १८ ॥
नटवेलावली देवगिरिश्चाल्हैयकस्ततः ।
सर्पर्दा देशकारश्च लच्छासागस्ततः स्मृतः १९ ॥
ककुभो माडरागश्च भैरवी सिंधुभैरवी ।
भूपालः शुद्धसामंतस्तोडिका गुर्जरी ततः ॥ २० ॥
मीयातोडी च लाचार्यासावरी जौनपूरिका ।
देशी च देवगांधारः खटो देशाख्य एव च ॥ २१ ॥

सूहा सुग्राइका मध्यमादिः सारंग एव च।
वृंदावनी तानसेनसारंगो वृद्धहंसकः ॥ २२ ॥
ततश्च गौडसारंगस्ततः स्यात्पटमंजरी।
धनाश्रीश्च ततः प्रोक्ता ततो भीमपलाशिका ॥ २३ ॥
हंसकंकणिका धानी ततो लीलांबरी स्मृता।
मूलतानी ततः पीलुर्बर्वा मारुस्ततः स्मृतः ॥ २४ ॥
मालीगौरो वराटी च जैत्रोऽथो मालवश्रिका।
पूर्वी त्रिवेणी टंकी च ततः साजिगिरी स्मृता ॥ २५ ॥
रेवा च मालवी जैत्रश्रीश्च पूर्याधनाश्रिका।
श्रीगौरी दीपकश्चाहोरागा एकोनसप्ततिः ॥ २६ ॥
यमनः शुद्धकल्याणो भूपाली च हमीरकः।
श्यामः कामोदको हेमश्चंद्रकांतो नटस्ततः ॥ २७ ॥
छायानाटश्च केदारो मलुहा चांदनी ततः।
पूरिया च खमाजश्च ततः खंबावती ततः २८ ॥
रागेश्वरी च दुर्गा च ततः प्रोक्तस्तिलंगकः।
झिंजूटी च पहाडी च सोरटो देस एव च ॥ २९ ॥
ततो जैजयवंती च कामोदस्तिलकादिकः।
गौंडमल्लारमल्लारौ मेघमल्लार एव च ॥ ३० ॥
ततश्च सुरमल्लारो मीयामल्लार एव च।
विहंगः शंकरः काफी सिंधुरो गारकस्ततः ॥ ३१ ॥
कर्णाटको नायकी च हुसेनी कौशिरेव च।
अड्डाणकः सहाना च वागीश्वरिबिहारकौ ॥ ३२ ॥
मालकौशिश्च हिंदोलो वसंतो भङ्किहारकः।
भंखारः पञ्चमश्चैव परजः सोहनी ततः ॥ ३३ ॥
कलिंगकश्च ललितपंचमो मेघरंजनी।
ललितान्ता रात्रिरागाः पंच पंचाशदीरिताः ॥ ३४ ॥

शतं चतुर्विंशतिश्च मिलिताः सर्व एव ते ।
सुधाकरेऽस्मिन् क्रमतो लक्षिताः स्वस्वलक्षणैः ॥ ३५ ॥
रागस्य नाम संपूर्णत्वादिवाद्यादिकं ततः ।
संगतिः स्वरसंख्यानं ज्ञेयं सर्वत्र लक्षणे ॥ ३६ ॥

इयं परिभाषा ॥

भैरवः ।

अथादौ भैरवो रागः संपूर्णः सर्वसंमतः ।
षड्जन्यासग्रहो धैवतांशः प्रातः सुखावहः ॥ ३७ ॥
मिथः संवादिनावस्मिन्मतावृषभधैवतौ ।
आंदोलनयुतावेतौ भवेतामतिरक्तिदौ ॥ ३८ ॥
आरोहेऽल्पत्वमृषभे बहुत्वं धैवते सदा ।
ऋषभः कोमलः प्रोक्तो गांधारस्तीव्र उच्यते ॥ ३९ ॥
मध्यमो धैवतोऽप्यत्र कोमलौ द्वौ समीरितौ ।
निषादस्तीव्र एव स्यादचलौ षड्जपंचमौ ॥ ४० ॥
निषादः कोमलोऽप्यत्र दृष्टो ग्रंथेषु केषुचित् ।
स चापि नैवरक्तिघ्नो यदीषदवरोहणे ॥ ४१ ॥
यतोऽस्मिन्भैरवे मुख्यौ रिधावेवातिरंजकौ ।
अतः परिश्रमेणैतौ प्रथमं साधयेद्बुधः ॥ ४२ ॥

बंगालभैरवः ।

बंगालभैरवो भेदो भैरवस्यात्र षाडवः ।
धैवतांशस्वरः षड्जग्रहन्यासः प्रकीर्तितः ॥ ४३ ॥
आरोहे चावरोहेऽपि निषादस्वरवर्जितः ।
परस्परं संवदतः स्वरावृषभधैवतौ ॥ ४४ ॥
षड्जधैवतयोरत्र संगती रक्तिदा भवेत् ।
अवरोहे तु गांधारस्वरो वक्र उदीरितः ॥ ४५ ॥
ऋषभः कोमलो ज्ञेयो गांधारस्तीव्रसंज्ञकः ।
कोमलावेव गदितावुभौ मध्यमधैवतौ ॥ ४६ ॥

गेयत्वमस्य कथितं प्रातरेव मनीषिभिः ।
शेषं सर्वं भैरवस्य लक्षणं समुदीरितम् ॥ ४७ ॥

आनंदभैरवः ।

आनंदभैरवो रागः संपूर्णोऽत्र प्रकीर्तितः ।
भैरवस्य प्रकारोऽन्यः षड्जन्यासग्रहांशकः ॥ ४८ ॥
षड्जमध्यमयोरत्र संवादः स्यान्मनोहरः ।
भैरवस्यैव सर्वेऽपि स्वराः स्युर्धैवतेतरे ॥ ४९ ॥
आरोहे चावरोहेऽत्र धैवतस्तीव्रसंज्ञकः ।
प्रातरेव हि संप्रोक्तं गानमस्य मनीषिभिः ॥ ५०
मृदुत्वादृषभस्येह पूर्वांगे भैरवः स्मृतः ।
तीव्रत्वाद्धैवतस्यापि वेलावल्युत्तरांगके ॥ ५१ ॥
वेलावलीभैरवयोर्मिश्रणाद्रागयोर्द्वयोः ।
विचित्ररूपवानेष मिश्ररागोऽभिगीयते ।
प्राधान्याद्भैरवांगस्य नाम्ना चानंदभैरवः ॥ ५२ ॥

शिवभैरवः ।

प्रकारो भैरवस्यैव रागः स्याच्छिवभैरवः ।
संपूर्णो धैवतांशश्च प्रत्यूषसमयोचितः ॥ ५३ ॥
गांधारश्च निषादश्च प्रारोहे तीव्रसंज्ञकौ ।
अवरोहे पुनस्तौ च कोमलौ समुदीरितौ ॥ ५४ ॥
अन्यत्सर्वं भैरवस्य लक्ष्मात्राप्यतिदिश्यते ।
मिश्ररागोऽयमपि च कथितः पूर्वरागवत् ॥ ५५ ॥
आरोहे गनितीव्रत्वं भैरवांगप्रदर्शकम् ।
अवरोहे तन्मृदुत्वं भैरवांगप्रकाशकम् ॥ ५६ ॥
प्राधान्याद्भैरवांगस्य नाम्नायं शिवभैरवः ।
इत्येवं बहवो भेदा भैरवस्य प्रकीर्तिताः ॥ ५७ ॥

प्रभातः ।

अथ प्रभातरागोऽत्र प्रभातसमयोचितः ।
मध्यमांशश्च संपूर्णः षड्जसंवादिनायुतः ॥ ५८ ॥

तीव्रौ निषादगांधारौ मध्यमर्षभधैवताः ।
कोमलाः कथिताः प्रायो भक्तिमार्गे प्रयुज्यते ॥ ५९ ॥
विलंबितलये गेयो ललितांगविभूषितः ।
द्रुते लये कदाचित्स्यात्कालिंगेन विमिश्रणम् ॥ ६० ॥
अंशत्वान्मध्यमस्येह भैरवाद्भिन्नता स्फुटा ।
प्रयोगः पंचमस्येह ललितस्य निवारकः ॥ ६१ ॥

सौराष्ट्रः ।

अथ सौराष्ट्ररागोऽयं प्रातः कालोचितो मतः ।
संपूर्णो मध्यमांशश्च षड्जसंवादिसंयुतः ॥ ६२ ॥
अत्र तीव्रः कोमलश्च धैवतौ द्वौ समीरितौ ।
आरोहे तीव्रसंज्ञः स्यादवरोहे तु कोमलः ॥ ६३ ॥
तीव्रौ निषादगांधारौ कोमलौ मध्यमर्षभौ ।
प्रयुक्तोऽपि निषादोऽत्र दुर्बलः समुदीरितः ॥ ६४ ॥
बंगालस्य कलिंगस्य पंचमस्य तथैव च ।
मिश्रणादेतदुत्पत्तिरिति केचन मन्वते ॥ ६५ ॥

रामकली ।

अथ रामकलीरागो धैवतांशो निरूपितः ।
तथा षड्जग्रहन्यासः संवादिऋषभांकितः ॥ ६६ ॥
आरोहणे मध्यमेन निषादेन च वर्जितः ।
अवरोहे तु सकलैः स्वरैः समभिभूषितः ॥ ६७ ॥
तथा चौडुवसंपूर्णो गीयते प्रातरेव हि ।
तीव्रौ निषादगांधारौ मध्यमर्षभधैवताः ॥ ६८ ॥
कोमलाः स्युः संगतिश्च धैवतर्षभयोरिह ।
कोमलस्य निषादस्य प्रयोगो दृश्यते क्वचित् ॥ ६९ ॥

गुणकली ।

प्रातर्गुणकलीरागो धैवतांशक औडुवः ।
आरोहे चावरोहे च निर्गांधारनिषादकः ॥ ७० ॥

मिथः संवादिनावत्र मतावृषभधैवतौ ।
मध्यमर्षभयोश्चापि संगती रक्तिदायिनी ॥ ७१ ॥
भैरवांगेन मधुरः प्रचारो मंद्रमध्ययोः ।
कोमलाः स्युस्त्रयो यत्रर्षभमध्यमधैवताः ॥ ७२ ॥

अहीरी ।

अहीरीत्यभिधो रागः प्रोक्तः षड्जग्रहांशकः ।
पंचमस्वरसंवादी संपूर्णो भैरवांगकः ॥ ७३ ॥
पूर्वांगे भैरवः स्पष्ट उत्तरांगे हरप्रिया ।
वैचित्र्यमस्य रागस्य तेनैव स्यान्मनोहरम् ॥ ७४ ॥
तीव्रौ धैवतगांधारौ कोमलौ मध्यमर्षभौ ।
निषादौ द्वौ स्वरैरेतैः प्रातरेव हि गीयते ॥ ७५ ॥

योगिनी ।

प्रसिद्धो योगिनीरागः षड्जन्यासग्रहांशकः ।
षड्जमध्यमयोरत्र संवादः स्यान्मनोहरः ॥ ७६ ॥
निषादहीन आरोहे सनिषादोऽवरोहणे ।
गांधारः सर्वथा त्याज्यस्तथा चौडुवषाडवः ॥ ७७ ॥
रिमयोर्धमयोर्वात्र संगती रक्तिदायिनी ।
अवरोहे पंचमोऽल्पः प्रातरेव हि गीयते ॥ ७८ ॥
कोमलाः स्युः स्वरा अत्र मध्यमर्षभधैवताः ।
निषादस्तीव्र आख्यातोऽवरोहे घर्षणान्वितः ॥ ७९ ॥

बिभासः ।

बिभास इतिविख्यातो रागः सर्वजनप्रियः ।
औडुवो धैवतांशश्च पंचमन्यासभूषितः ॥ ८० ॥
निषादमध्यमावस्मिन्नुभावपि विवर्जितौ ।
तीव्रगांधारसंवादी कोमलर्षभधैवतः ॥ ८१ ॥
रमणीयात्र गांधारपंचमस्वरसंगतिः ।
प्रभातसमये चारु गीयते पंचभिः स्वरैः ॥ ८२ ॥

### वेलावली ।

अथ वेलावलीरागः प्रोक्तः षड्जग्रहांशकः ।
पंचमस्वरसंवादी संपूर्णः सर्वसंमतः ॥ ८३ ॥
धैवतांशश्च गांधारसंवादी कैश्चिदुच्यते ।
आरोहणे मध्यमश्च निषादश्चाल्प ईरितः ॥ ८४ ॥
कैश्चिदुच्यत आरोहे निषादो वक्र इत्यपि ।
अवरोहे च गांधारो दुर्बलः समुदीरितः ॥ ८५ ॥
संगतिर्धमयोः प्रोक्ता गीयते प्रातरेव हि ।
स्वरा ऋषभगांधारधैवताः सनिषादकाः ॥ ८६ ॥
तीव्रा भवंति चत्वारो मध्यमः कोमलः स्मृतः ।
हिंदुस्थानिमते प्रोक्तः शुद्धमेलोऽयमेव हि ॥ ८७ ॥

### शुक्लवेलावली ।

शुक्लवेलावलीरागो वेलावल्याः प्रकारकः ।
वेलावल्याः स्वरैरेव संपूर्णो गीयते प्रगे ॥ ८८ ॥
मध्यमांशः समाख्यातः षड्जसंवादिभूषितः ।
आरोहे दुर्बलो रिः स्यान्मध्यमे न्यास ईरितः ॥ ८९
अवरोहे कोमलोऽपि निषादो धैवतानुगः ।
संस्पृश्यते तद्रागेऽस्मिन्भवेद्रक्तिप्रदायकम् ॥ ९० ॥

### यमनवेलावली ।

रागा यमनवेलावल्याख्यः संपूर्ण उच्यते ।
षड्जग्रहांशः संवादिपंचमेन समन्वितः ॥ ९१ ॥
तीव्रो मध्यम आरोहेऽवरोहे कोमलो मतः ।
तीव्रमध्यम आरोहे यमनांगप्रदर्शकः ॥ ९२ ॥
अवरोह कोमलो मो वेलावल्यंगदर्शकः ।
अन्यद्वेलावलीलक्ष्म सर्वमत्रातिदिश्यते ॥ ९३ ॥
स्वरा ऋषभगांधारधैवताः सनिषादकाः ।
चत्वारोऽभिहितास्तीव्रा मध्यमौ तीव्रकोमलौ ॥ ९४ ॥

नटवेलावली ।

नटवेलावलीरागः संपूर्णो मध्यमांशकः ।
षड्जसंवादिसंयुक्तो मिश्ररूपः समीरितः ॥ ९५ ॥
आरोहे स्पष्टमाभाति नटरागसरूपता ।
अवरोहे तु वेलावल्यंगं पूर्वोक्तलक्षणम् ॥ ९६ ॥
निषादर्षभगांधारधैवतास्तीव्रसंज्ञकाः ।
मध्यमः कोमलाभिख्यः सर्वे वेलावलिस्वराः ९७ ॥
संगतिश्चात्र ऋषभधैवतस्वरयोः प्रिया ।
वेलावल्याः प्रकारोऽसावपि प्रातः प्रगीयते ॥ ९८ ॥

देवगिरिः ।

वेलावल्याः प्रकारेषु रागो देवगिरिः स्मृतः ।
षड्जग्रहांशः संपूर्णः कल्याणांगविभूषितः ॥ ९९ ॥
निषादर्षभगांधारधैवतास्तीव्रसंज्ञकाः ।
मध्यमः कोमलश्चेति स्वरा अत्र प्रकीर्तिताः ॥ १०० ॥
अवरोहे च गांधारधैवतौ दुर्बलौ मतौ ।
निषादः कोमलोऽपीष्टोऽवरोहे धैवतानुगः ॥ १ ॥
क्वचिल्लक्ष्ये नातिदीर्घस्तीव्रमध्यम ईक्ष्यते ।
शेषं वेलावलीतुल्यं ज्ञेयमत्र मनीषिभिः ॥ २ ॥

अल्हैय्या ।

अल्हैयाराग आख्यातो वेलावल्याः प्रकारकः ।
धैवतांशश्च गांधारस्वरसंवादिनान्वितः ॥ ३ ॥
गीयते प्रातरारोहे मध्यमस्वरवर्जितः ।
मतः षाडवसंपूर्णोऽवरोहे सप्तभिः स्वरैः ॥ ४ ॥
निषादः कोमलोऽपीषद्विलोमे धैवतानुगः ।
स्वरा ऋषभगांधारधैवतास्तीव्रसंज्ञकाः ।
मध्यमः कोमलः प्रोक्तो निषादौ तीव्रकोमलौ ॥ ५ ॥

सर्पर्दा ।

शुद्धमेलोद्भवो रागः सरपर्दाभिविश्रुतः ।
षड्जग्रहांशः संपूर्णस्तथा संवादिपंचमः ॥ ६ ॥
कैश्चिद्धैवतसंवादी गांधारांशोऽभिधीयते ।
तीव्रौ रिगौ धनी चापि मध्यमः कोमलः स्मृतः ॥ ७ ॥
यदि किंचिद्विहंगस्य रूपमत्र समुद्भवेत् ।
आयतेनर्षभेणैव बुधस्तत्परिमार्जयेत् ॥ ८ ॥
अल्हैय्या सरपर्दा चेत्युभौ यवनगायकैः ।
कैश्चित्प्रसिद्धिमानीतावभूतां जनरंजकौ ॥ ९ ॥

देशीकारः ।

अथ देशीकाररागः प्रसिद्धो धैवतांशकः ।
गांधारस्वरसंवादी पंचमन्याससुंदरः ॥ ११० ॥
मध्यमेन निषादेन वर्जितः स्यात्तथौडुवः ।
स्वरास्तीव्रा भवंत्यत्रर्षभगांधारधैवताः ॥ ११ ॥
दृष्टौ यद्यपि भूपालीदेशीकारौ सरूपकौ ।
अंशभेदात्तयोर्भेदः स्वीकृतोऽत्र मनीषिभिः ॥ १२ ॥
गांधारांशेन भूपाली पूर्वरात्रे प्रयुज्यते ।
देशीकारौ धैवतांशः प्रातःकाले प्रयुज्यते ॥ १३ ॥

लच्छासागः ।

अथ लच्छासागरागो मनोज्ञो धैवतांशकः ।
संपूर्णश्चैव गांधारसंवाद्युषसि गीयते ॥ १४ ॥
तीव्रा ऋषभगांधारधैवतास्त्रय ईरिताः ।
मध्यमः कोमलश्चैव निषादौ तीव्रकोमलौ ॥ १५ ॥
तीव्रो निषाद आरोहे कोमलस्त्ववरोहणे ।
खंमाजस्य प्रतिच्छाया किंचिदत्र प्रदृश्यते ॥ १६ ॥
वेलावलिश्च खंमाज उभौ संमिश्रितौ यदा ।
तदा लच्छासागरागसमुत्पत्तिरभूद्ध्रुवम् ॥ १७ ॥

कुकुभः ।

प्रसिद्धः ककुभो रागः संपूर्णः पंचमांशकः ।
ऋषभः स्वरसंवादी वेलावल्याः प्रकारकः ॥ १८ ॥
संगतिश्चात्र ऋषभपंचमस्वरयोर्मता ।
जैजैवंती मिश्रितास्मिगानं प्रातरुदीरितम् ॥ १९ ॥
ऋषभश्चैव च गांधारो धैवतश्च निषादकः ।
चत्वारः स्युस्तीव्रसंज्ञाः कोमलो मध्यमस्वरः ॥ १२० ॥

माडः ।

अथ मेवाडदेशीयो माडरागः प्रकीर्तितः ।
षड्जग्रहांशकन्यासः संपूर्णः सार्वकालिकः ॥ २१ ॥
निषादर्षभगांधारधैवतास्तीव्रसंज्ञकाः ।
मध्यमः कोमलश्चात्र संवादी पंचमस्वरः ॥ २२ ॥
आरोहे दुर्बलावत्र स्वरावृषभधैवतौ ।
अवरोहे वक्रता च निषादे कंपनं स्मृतम् ॥ २३ ॥

भैरवी ।

मधुरो भैरवीरागो भवेत्सर्वजनप्रियः ।
षड्जग्रहांशः संवादिमध्यमस्वरसुंदरः ॥ २४ ॥
कैश्चिद्धैवतगांधारवादिसंवादिरीरितः ।
सरलारोहावरोहः संपूर्णः प्रातरीरितः ॥ २५ ॥
ऋषभश्चैव गांधारो मध्यमश्चैव धैवतः ।
निषादः कोमलाः सर्वे क्वचित्तीव्रोऽपि मध्यमः ॥ २६ ॥
आरोहे ऋषभस्तीव्रः क्वचिदेव समीरितः ।
कदाचिद्धैवतोऽप्यत्र तीव्रो भाति प्रसंगतः ॥ २७ ॥
प्रायः स्वैरप्रचारोऽयं सर्वथैव मनोरमः ।
ग्रंथदृष्टयाऽस्य रागस्य सर्वकोमलतैव हि ॥ २८ ॥

सिंधुभैरवी ।

स्यात्सिंधुभैरवीरागः संपूर्णो मध्यमांशकः ।
आरोहे तीव्र ऋषभोऽवरोहे कोमलर्षभः ॥ २९ ॥

गांधारी मध्यमश्चैव धैवतश्च निषादकः ।
कोमला एव चत्वारः संवादी षड्ज उच्यते ॥ १३० ॥
पंचमे षड्जमारोप्य मंद्रमध्यस्वरैर्यदि ।
गीयते भैरवी सैव जायते सिंधुभैरवी ॥ ३१ ॥

भूपालः ।

भैरवीमेलसंभूतो भूपालः प्रातरौडुवः ।
मध्यमेन निषादेन विहीनो धैवतांशकः ॥ ३२ ॥
गांधारस्त्वत्र संवादी समाख्यातो मनीषिभिः ।
धैवतर्षभगांधारास्त्रयः स्युः कोमलाः स्वराः ३३ ॥

शुद्धसामंतः ।

शुद्धसामंतरागोऽत्र भवेदौडुवषाडवः ।
आरोहणे तु गांधारनिषादाभ्यां विवर्जितः ॥ ३४ ॥
अवरोहे निषादेन भवेदेकेन वर्जितः ।
षड्जग्रहांशः संवादिमध्यमेन विराजितः ॥ ३५ ॥
धैवतर्षभगांधारमध्यमैः कोमलैः स्वरैः ।
गीयते गीतकुशलैः प्रथमप्रहरेऽहनि ॥ ३६ ॥

तोडी ।

तोडीरागोऽस्ति गंभीरः संपूर्णो धैवतांशकः ।
सदांदोलितसंवादिगांधारस्वरशोभितः ॥ ३७ ॥
धैवतर्षभगांधारास्त्रयः स्युः कोमलाः स्वराः ।
निषादमध्यमौ तीव्रावुभावत्र समीरितौ ॥ ३८ ॥
आरोहे ऋषभश्चात्र दुर्बलः समुदीरितः ।
गानमस्य समीचीनं द्वितीयप्रहरेऽहनि ॥ ३९ ॥

गुर्जरी ।

प्रख्यातो गुर्जरीतोडीरागः स्याद्धैवतांशकः ।
आरोहे चावरोहेऽपि पंचमस्वरवर्जितः ॥ १४० ॥

अतोऽसौ षाडवः प्रोक्तः संवादिऋषभस्वरः ।
धैवतर्षभगांधारास्त्रय एव हि कोमलाः ॥ ४१ ॥
मध्यमश्च निषादश्च तीव्रावभिहितावुभौ ।
गीयतेऽपि च तोडीव द्वितीयप्रहरेऽहनि ॥ ४२ ॥

मीयातोडी ।

गुर्जर्यामेव हि मनाक्पंचमस्य प्रवेशतः ।
तानसेनप्रयुक्तत्वान्मीयातोडीति नाम वै ॥ ४३ ॥
अंशसंवादितीव्रत्वकोमलत्वादिलक्षणम् ।
सकलं गुर्जरीतुल्यं स्वयमूह्यं मनीषिभिः ॥ ४४ ॥
अल्पत्वं पंचमस्येह रागभेदस्य कारणम् ।
मंद्रमध्यस्वरैर्गानं विलंबितलये भवेत् ॥ ४५ ॥

लाचारीतोडी ।

शुद्धतोड्यां यदा किंचित्कोमलो मध्यमो भवेत् ।
तदा भवति लाचारीतोडीत्येवं जगुर्बुधाः ॥ ४६ ॥
अंशसंवादितीव्रत्वकोमलत्वादिलक्षणम् ।
शुद्धतोडीसमं सर्वं स्वतो ज्ञेयं विजानता ॥ ४७ ॥
एवं बहुविधास्तोड्यो रागांतरविमिश्रिताः ।
प्रसिद्धिं च समानीता लोके यवनगायकैः ॥ ४८ ॥
कर्णाटामिश्रिता तोडी दरबारीति विश्रुता ।
तोडी विलासखानी स्यादासावर्या विमिश्रिता ॥ ४९ ॥
आसा लछूमी च गांधारी तथा देसी बहादुरी ।
एवमन्येऽपि रागाः स्युर्दृष्टा ग्रंथेषु नैव ते ॥ १५० ॥
तुरुष्कपुष्कईराखाहिजेजनवरोजकाः ।
नाखरेजकसर्पर्दासूहासुगदुगादयः ॥ ५१ ॥
तथापि संमताः सर्वे निजलक्षणलक्षिताः ।
रंजनाद्रागतेत्युक्तं युक्तं तत्सूक्तमेव हि ॥ ५२ ॥
यद्यत्स्याद्रंजकं रूपं तत्तद्ग्राह्यमसंशयम् ।
बालात्सुभाषितन्यायं विषयेऽस्मिन्नुदाहरेत् ॥ ५३ ॥

आसावरी ।

भवत्यासावरीरागो मधुरो धैवतांशकः ।
आरोहे स च गांधारनिषादस्वरवर्जितः ॥ ५४ ॥
अवरोहे तु संपूर्णः संगवे गीयते बुधैः ।
तथा चौडुवसंपूर्णोऽवरोहे स्वल्पमध्यमः ॥ ५५ ॥
अत्र धैवतगांधारस्वरौ संवदतो मिथः ।
ऋषभस्तीव्र आरोहेऽवरोहे कोमलो मतः ॥ ५६ ॥
रम्या पंचमगांधारस्वरयोः संगतिर्भवेत् ।
गांधारो मध्यमश्चैव धैवतश्च निषादकः ।
चत्वारः कोमलाः प्रोक्ता ऋषभौ तीव्रकोमलौ ॥ ५७ ॥

जौनपूरी ।

जौनपूरी निषादांशा धैवतांशापि संमता ।
गांधारसंवादिनी चर्षभसंवादिनी तथा ॥ ५८ ॥
आसावर्याः स्वरैरेव सदा तीव्रर्षभा भवेत् ।
आरोहे गांधारहीना संपूर्णा चावरोहणे ॥ ५९ ॥
अतः षाडवसंपूर्णा संगवे गीयते बुधैः ।
सुलतानहुसेनेन निर्मितेतिजनश्रुतिः ॥ १६० ॥

देसी ।

आसावरीमेलभवा देशी षड्जांशका स्मृता ।
आरोहे सापि गांधारधैवतस्वरवर्जिता ॥ ६१ ॥
अवरोहे च संपूर्णा संवदत्पंचमस्वरा ।
मता चौडुवसंपूर्णा निषादर्षभसंगतिः ॥ ६२ ॥
केचिन्निरूपयंत्यस्यास्तीव्रत्वं धैवतस्वरे ।
अपरे धैवतद्वंद्वमिति पक्षत्रयं स्मृतम् ॥ ६३ ॥
गांधारे कंपरुचिरा गीयते संगवे बुधैः ।

देवगांधारः ।

देवगांधाररागश्चासावरीमेलसंभवः ।
षड्जांशन्यास आरोहे धैवतर्षभवर्जितः ॥ ६४ ॥

अवरोहे तु संपूर्णो मध्यमोद्ग्राहसुंदरः ।
तथा चौडुवसंपूर्णः संवदत्पंचमस्वरः ॥ ६५ ॥
धनाश्रीसदृगारोहेऽवरोहेऽऽसावरीसदृक् ।
गीयते गाननिपुणैर्द्वितीयप्रहरेऽहानि ॥ ६६ ॥

खटः ।

आसावरीमेलजन्यः खटरागोऽतिविश्रुतः ।
संपूर्णो धैवतांशश्च पंचमन्यास एव च ॥ ६७ ॥
संकीर्णो मध्यमोद्ग्राहो द्विगांधारो द्विधैवतः ।
मृदुगांधारसंवादी संगवे चैव गीयते ॥ ६८ ॥
पूर्वांगे भैरवाकार आसावर्युत्तरांगकः ।
एके वदंति षड्रागसंकरात्खटनामकः ॥ ६९ ॥

देशाख्यः ।

अथ देशाख्यरागोऽपि संपूर्णः प्रणिगद्यते ।
षड्जांशो न्याससंवादिमध्यमो धगदुर्बलः ॥ १७० ॥
मृदू निषादगांधारौ मृदू मध्यमधैवतौ ।
सपौ तीव्रश्च ऋषभो देशाख्यस्वरमेलकः ॥ ७१ ॥
कर्णाटमेघमिश्रोऽयं गांधारांदोलनाप्रियः ।
कैश्चिद्धैवतवर्ज्योऽपि संगवे गीयते बुधैः ॥ ७२ ॥

सूहा ।

कर्णाटमेलसंभूतः सूहारागः प्रकीर्तितः ।
षड्जांशकः षाडवोऽयं संवादिन्यासमध्यमः ॥ ७३ ॥
आरोहेऽप्यवरोहे च धैवतस्वरवर्जितः ।
स्वरा निषादगांधारमध्यमाः कोमलाः स्मृताः ॥ ७४ ॥
ऋषभस्तीव्र आख्यातो गीयते कुतुपे बुधैः ।
संगतिः स्यान्निषादेन पंचमस्य मनोहरा ॥ ७५ ॥
विमिश्रणात्समुद्भूतो मेघकर्णाटरागयोः ।
मध्यरात्रे यथाड्डाणस्तथा मध्यंदिनेऽप्यसौ ॥ ७६ ॥

सुगराई ।

सुगराईनामरागो भवेत्षड्जग्रहांशकः ।
पंचमस्वरसंवाद्यारोहे धैवतवर्जितः ॥ ७७ ॥
तथाषाडवसंपूर्णः सारंगांगविराजितः ।
स्वरा निषादगांधारमध्यमाः कोमलाः स्मृताः ॥ ७८ ॥
धैवतर्षभकौ तीव्रावुभावत्र समीरितौ ।
यथा साहानार्धरात्रे तथार्धदिवसेऽप्ययम् ॥ ७९ ॥

मध्यमादिः ।

सारंगस्य प्रकारोऽथ मध्यमादिः प्रकीर्तितः ।
ऋषभांशः स गांधारधैवतस्वरवर्जितः ॥ १८० ॥
तथा चौडुव एव स्यात्संवादी पंचमस्वरः ।
मध्यमश्च निषादश्च कोमलौ द्वौ समीरितौ ॥ ८१ ॥
ऋषमस्तीव्र आख्यातो निपयोः संगतिः प्रिया ।
कैश्चिन्निषादवाद्युक्तो मध्याह्ने चैव गीयते ॥ ८२ ॥

शुद्धसारंगः ।

शुद्धसारंगरागः स्याद्गांधारस्वरवर्जितः ।
ऋषभांशः षाडवश्च संवादी पंचमस्वरः ॥ ८३ ॥
संगतिश्चात्र मधुरा स्यात्पंचमनिषादयोः ।
मध्याह्नसमये चास्य गानं परमरक्तिदम् ॥ ८४ ॥
ऋषभो धैवतश्चैव तीव्रौ द्वौ समुदीरितौ ।
मध्यमश्च निषादश्च कोमलौ द्वौ समीरितौ ॥ ८५ ॥

वृंदावनी ।

वृंदावनी च सारंगः प्रसिद्ध ऋषभांशकः ।
पंचमस्वरसंवादी भवेदौडुवषाडवः ॥ ८६ ॥
आरोहे संपरित्याज्यावुभौ गांधारधैवतौ ।
अवरोहे धैवतस्तु किंचित्संग्राह्यतेऽपि च ॥ ८७ ॥

सारंगस्यैव सर्वेऽपि स्वरा अत्र प्रकीर्तिताः ।
निषादस्तु भवेत्तीव्र इतरस्तद्वदेव हि ॥ ८८ ॥

मीयासारंगः ।

तानसेनप्रयुक्तोऽत्र मीयासारंग उच्यते ।
मंद्रमध्यस्वरैर्गीतो भवेद्रक्तिविवर्धकः ॥ ८९ ॥
ऋषभांशः षाडवश्च संवादी पंचमस्वरः ।
धनयोः संगतिरीषत्स्यान्मंद्रे रक्तिदायिनी ॥ १९० ॥
मीयामल्लाररागस्य छायेषदभिलक्ष्यते ।
कर्णाटस्तानसेनस्य राग आसीदतिप्रियः ॥ ९१ ॥
तस्य छायाप्यत्र किंचिदिति केचन मन्वते ।
मध्याह्नसमये गानं सारंगत्वादतिप्रियम् ॥ ९२ ॥

बडहंसः ।

बडहंसोऽस्ति सारंगविशेषो बहुसंमतः ।
गांधारस्वरहीनश्च षाडवः पंचमांशकः ॥ ९३ ॥
षड्जपंचमसंवादो मिथः परमसुंदरः ।
सारंगस्यैव सर्वेऽत्र स्वराः स्युस्तीव्रकोमलाः ॥ ९४ ॥
मध्यमः प्रबलश्चात्र भवेद्रक्तिप्रदायकः ।
मध्याह्नसमये चैव गीयते गीतकोविदैः ॥ ९५ ॥
एवं हि सूरसारंगो लूमसारंग एव च ॥
लंकादहनसारंग इतिभेदाः समीरिताः ॥ ९६ ॥

गौडसारंगः ।

अथ स्याद्गौडसारंगरागो वक्रस्वरूपकः ।
गांधारांशश्च संपूर्णस्तथा संवादिधैवतः ॥ ९७ ॥
निषादोऽत्र भवेदल्पो मध्यमौ स्त उभावपि ।
अवरोहे च गांधारस्वरो वक्र उदीरितः ॥ ९८ ॥
निषादर्षभगांधारधैवतास्तीव्रसंज्ञकाः ।
तीव्रश्च कोमलश्चैव मध्यमोऽत्र निरूपितः ॥ ९९ ॥

कोमलो मो भवेन्मुख्यस्तीव्रो गौणः समीरितः ।
धैवतांशः कैश्चिदुक्तो गेयो मध्याह्नतः परम् ॥ २०० ॥

पटमंजरी ।

पटमंजर्याख्यरागः षड्जन्यासग्रहांशकः ।
पंचमस्वरसंवादी गीयते चापराह्णके ॥ १ ॥
गांधारधैवतावस्मिन्नारोहे दुर्बलौ मतौ ।
स्वरा निषादगांधारमध्यमा कोमलाः स्मृताः ॥ २ ॥
धैवतर्षभकौ तीव्रौ समाख्यातौ मनीषिभिः ।
कैश्चिदप्यत्र कथितौ गांधारौ तीव्रकोमलौ ॥ ३ ॥

धनाश्रीः ।

धनाश्रीश्च प्रसिद्धोऽयं रागः स्यात्पंचमांशकः ।
षड्जसंवादिरुचिरो निषादग्रहशोभनः ॥ ४ ॥
पंचमन्यास आरोहे वर्जितर्षभधैवतः ॥
अवरोहे च संपूर्णोऽपराह्णसमये प्रियः ॥ ५ ॥
अत औडुवसंपूर्णस्तीव्रावृषभधैवतौ ।
गांधारो मध्यमश्चैव निषादश्चापि कोमलाः ॥ ६ ॥
प्रिया पंचमगांधारसंगतिश्चावरोहणे ।
इयं तु काफीमेलोक्ता धनाश्रीर्वर्णिता मया ॥ ७ ॥
कुत्रचिद्भैरवीमेले पूर्वीमेलेऽपि कुत्रचित् ।
आरोहे रिधहीनैव कथितेयं विचक्षणैः ॥ ८ ॥

भीमपलासी ।

रागो भीमपलासीति प्रसिद्धो जनसंमतः ।
मध्यमांशः समाख्यातः षड्जसंवादिमंडितः ॥ ९ ॥
आरोहेऽत्रापि ऋषभधैवतौ वर्जितावुभौ ।
तथैवौडुवसंपूर्णोऽपराह्णे संप्रयुज्यते ॥ २१० ॥
स्वरा निषादगांधारमध्यमाः कोमलाः स्मृताः ।
धैवतर्षभकौ तीव्रौ विद्वद्भिरवधीरितौ ॥ ११ ॥

त्यज्यते ऋषभः कैश्चिदत्रारोहावरोहयोः ।
तन्मते संमतश्चायं राग औडुवषाडवः ॥ १२ ॥

हंसकंकणी ।

स्याद्धंसकंकणीरागो मधुरः पंचमांशकः ।
षड्जसंवादिरुचिरोऽपराह्णसमयोचितः ॥ १३ ॥
वार्जितावस्य चारोहे स्वरावृषभधैवतौ ।
अवरोहे च संपूर्णो धनाश्र्यंगेन गीयते ॥ १४ ॥
अयं चौडुवसंपूर्णस्तीव्रावृषभधैवतौ ।
निषादमध्यमावत्र कोमलौ समुदीरितौ ॥ १५ ॥
गांधारस्तीव्र आरोहेऽवरोहे कोमलो मतः ।
अप्रसिद्धमिदं रूपं विचित्रं समुदीरितम् ॥ १६ ॥

धानी ।

धानीरागोऽथ रुचिरो गांधारांशः समीरितः ।
आरोहेऽप्यवरोहे च वर्जितर्षभधैवतः ॥ १७ ॥
औडुवोऽयं निषादेन प्रियसंवादिनान्वितः ।
गांधारो मध्यमश्चैव निषादश्चापि कोमलः ॥ १८ ॥
प्रोक्तः शुद्धधनाश्रीरित्ययं कैश्चिद्विचक्षणैः ।
गीयते सर्वदा चायं सर्वकालसुखावहः ॥ १९ ॥

लीलांबरी ।

अथ लीलांबरीरागः पंचमांशो जनप्रियः ।
षड्जसंवादिरुचिर आरोहे वर्ज्यधैवतः ॥ २२० ॥
तथा षाडवसंपूर्णः षड्जपंचमसंगतिः ।
आरोहे तीव्रगांधारप्रयोगो लक्ष्यते क्वचित् ॥ २१ ॥
धैवतर्षभकौ तीव्रौ मध्यमः कोमलः स्मृतः ।
तीव्रकोमलगांधारौ निषादौ तीव्रकोमलौ ॥ २२ ॥

मूलतानी ।

मूलतानीति रागोऽथ प्रसिद्धः पंचमांशकः ।
स्यान्निषादग्रहश्चैव षड्जसंवाद्यलंकृतः ॥ २३ ॥

आरोहणे च ऋषभधैवतस्वरवर्जितः ।
अवरोहणसंपूर्णोऽपराह्णसमयप्रियः ॥ २४ ॥
अस्मिन्नृषभगांधारधैवताः कोमलाः स्वराः ।
निषादमध्यमौ तीव्रावाख्यातौ गीतवेदिभिः ॥ २५ ॥
सदामध्यमगांधारस्वरयोः संगतिः प्रिया ।
तयोरेवांदोलनं च भवेदानंददायकम् ॥ २६ ॥

पीलुः ।

पीलुरागोऽथ संपूर्णो मृदुगांधारकांशकः ।
अनेकरागसंमिश्रो भवेत्सहजसुंदरः ॥ २७ ॥
मतस्तीव्रनिषादोऽत्र संवादी जनमोहनः ।
यथायोगं सर्वतीव्रकोमलस्वरमंडितः ॥ २८ ॥
काफी भीमपलासी च भैरवी मूलतानिका ।
गौरीत्येते मिलंत्यत्र स्वतंत्रो गीयते सदा ॥ २९ ॥

बर्वा ।

बर्वेत्यपि च रागोऽस्ति क्षुद्रगीतसमाश्रयः ।
ऋषभांशश्च संपूर्णः संवदत्पंचमस्वरः ॥ ३० ॥
द्वौ गांधारौ धैवतौ द्वौ निषादौ द्वौ समीरितौ ।
ऋषभस्तीव्र आख्यातो मध्यमः कोमलः स्मृतः ॥ ३१ ॥
इमावाधुनिकौ रागौ पीलुबर्वेतिनामकौ ।
मन्ये प्रसिद्धिमानीतौ नूनं विशिखगायकैः ॥ ३२ ॥

मारुः ।

मारुरागोऽथ प्रसिद्धः षाडवो धैवतांशकः ।
ऋषभस्वरसंवादी नित्यं पंचमवर्जितः ॥ ३३ ॥
तीव्रौ निषादगांधारौ तीव्रौ मध्यमधैवतौ ।
ऋषभः कोमलस्त्वेकः कथितो गीतिवेदिभिः ॥ ३४ ॥
ऋषभांशं केचिदाहुः षड्जांशमपरे विदुः ।
श्रमगम्यो गीयतेऽयं चतुर्थप्रहरेऽहनि ॥ ३५ ॥

मालीगौरः ।

अथ मालीगौररागस्त्वृषभांशग्रहो मतः ।
संपूर्णश्चैव संवादिधैवतस्वरशोभनः ॥ ३६ ॥
तीव्रौ निषादगांधारौ तीव्रौ धैवतमध्यमौ ।
ऋषभः कोमलश्चैको गदितः स्वरवेत्तृभिः ॥ ३७ ॥
मंद्रमध्यप्रचारेण प्रायशः शोभतेतराम् ।
श्रीरागपूरियामिश्रः सायंकाले प्रगीयते ॥ ३८ ॥
पूरियायां पंचमस्य प्रवेशो जायते यदा ।
तदोद्भवत्ययं राग इतिकेचिद्वदंत्यपि ॥ ३९ ॥

वराटी ।

वराटीराग आख्यातो गांधारांशो मनीषिभिः ।
धैवतस्वरसंवादी संपूर्णः सर्वसंमतः ॥ २४० ॥
तीव्रा निषादगांधारमध्यमाः सहधैवताः ॥
ऋषभः कोमलश्चैकः कविभिः समुदीरितः ॥ ४१ ॥
संगतिश्चात्र गांधारपंचमस्वरयोरिति ।
यद्वै वदंति तद्युक्तं मध्यमो दुर्बलो यतः ॥ ४२ ॥
कौंतलीद्राविडीत्याद्याः संत्यनेका वराटिकाः ॥
द्रष्टव्याः पारिजाते ता इयं सायं प्रगीयते ॥ ४३ ॥

जैत्रः ।

जैत्ररागो मारुमेले कथितः पंचमांशकः ।
संवादिषड्ज आरोहेऽवरोहे च विवर्जितौ ॥ ४४ ॥
निषादमध्यमावत्र तथा चौडुव एव च ।
गांधारधैवतौ तीव्रावृषभः कोमलो मतः ॥ ४५ ॥
केषांचिन्मत आदिष्टो जैत्रः कल्याणमेलजः ।
पूर्वरात्रे स गेयः स्यादयं सायं प्रगीयते ॥ ४६ ॥

मालवश्रीः ।

अथ रागो मालवश्रीः प्रसिद्धः सायमौडुवः ।
भवेन्नित्यं धैवतर्षभवर्जितः ॥ ४७ ॥
पंचमांशो भवेन्नित्यं धैवतर्षभवार्जितः ॥ ४७ ॥

स्वरा मध्यमगांधारनिषादास्तीव्रसंज्ञकाः ।
रुचिरा चात्र गांधारपंचमस्वरसंगतिः ॥ ४८ ॥
संवादी च भवेत्षड्ज इत्याहुः सांप्रदायिकाः ।
मालवश्रीस्तु सगपैस्त्रिस्वरा कैश्चिदुच्यते ॥ ४९ ॥
नतद्युक्तमहं मन्ये न रागस्त्रिचतुःस्वरः ।
यत औडुवतो न्यूनो न भवेच्छास्त्रसंमतः ॥ २५० ॥
निषादमध्यमावत्र दुर्बलाविति युक्तितः ।
अलंकर्तव्यमपि तन्मतं त्रिस्वरवादिनाम् ॥ ५१ ॥

पूर्वी ।

पूर्वीरागः प्रसिद्धोऽथ गांधारांश उदीरितः ।
संपूर्णो निजसंवादिनिषादेन मनोरमः ॥ ५२ ॥
तीव्रा निषादगांधारमध्यमा धैवतर्षभौ ।
कोमलावत्र कथितौ किंचित्कोमलमध्यमः ॥ ५३ ॥
अवरोहे प्रयुक्तः स्याद्गांधारानुगतः स वै ।
गानं निश्चितमेवास्य सायंकाले मनोहरम् ॥ ५४ ॥

त्रिवेणी ।

अथ त्रिवेणीरागः स्यात्पूर्वीसंस्थानसंभवः ।
आरोहे चावरोहे स मध्यमस्वरवर्जितः ॥ ५५ ॥
षाडवो ऋषभांशश्च संवादी पंचमस्वरः ।
तीव्रौ निषादगांधारौ कोमलौ धैवतर्षभौ ॥ ५६ ॥
संगतिश्चात्र गांधारपंचमस्वरयोः प्रिया ।
रक्तिप्रदावरोहे स्याच्छ्रीरागांगमनोहरा ॥ ५७ ॥
श्रीः पूर्वी च तथा जैत्र एतत्त्रितयमेलनात् ।
त्रिवेणीयं समुद्भूता गीयते सायमेवहि ॥ ५८ ॥

टंकी ।

टंकीरागश्च कथितः पूर्वीमेलसमुद्भवः ।
संपूर्णः पंचमांशश्च संवादिऋषभस्वरः ॥ ५९ ॥

तीव्रा निषादगांधारमध्यमा धैवतर्षभौ ।
कोमलौ कथितावत्र सायंकाले च गीयते ॥ २६० ॥
कैश्चिन्मध्यमवर्ज्यश्च वर्णितोऽयं त्रिवेणिवत् ।
वादिभेदाद्रागभेद इति युक्तं तदप्युत ॥ ६१ ॥

साजगिरी ।

अथ साजागिरीरागः प्रख्यातः सकलप्रियः ।
गांधारांशश्च संपूर्णः स्यात्संवादिनिषादकः ॥ ६२ ॥
धैवतद्वयसंयुक्त ईषत्कोमलमध्यमः ।
तीव्रा निषादगांधारमध्यमाः कोमलर्षभः ॥ ६३ ॥
रुचिरात्र स्यान्निषादमध्यमस्वरसंगतिः ।
मंद्रमध्यप्रचारश्च सायंकालमनोहरः ॥ ६४ ॥
समुद्भूतः पूरियायाः पूर्विकायाश्च मिश्रणात् ।
विचित्रं रूपमेतत्स्यादपूर्वं लक्ष्यवर्त्मनि ॥ ६५ ॥

रेवा ।

रेवारागश्च मधुरः षड्जांशः समुदीरितः ।
पंचमस्वरसंवादी सायंकाले प्रयुज्यते ॥६६ ॥
निषादमध्यमौ वर्ज्यावत्रारोहावरोहयोः ।
तीव्रो भवति गांधारः कोमलौ धैवतर्षभौ ॥ ६७ ॥
संगतिश्चैव गांधारपंचमस्वरयोः प्रिया ।
गांधारांशोऽप्ययं कैश्चित्कथितो रागवेदिभिः ॥ ६८ ॥

मालवी ।

अथ स्यान्मालवीरागः सायंकालोचितः प्रियः ।
ऋषभांशश्च संवादिपंचमस्वरसंगतः ॥ ६९ ॥
संपूर्णोऽभिमतश्चायमवरोहे तु धैवतः ।
दुर्बलः स्यात्तथारोहे निषादोऽपि च दुर्बलः ॥ २७० ॥
तीव्रा निषादगांधारमध्यमा धर्षभौ मृदू ।
विलंबितलयोपेतः श्रीरागांगेन गीयते ॥ ७१ ॥

जैत्रश्रीः ।

जैत्रश्रीरितिरागश्च सायंकालोचितो मतः ।
गांधारांशो निषादेन निजसंवादिनाश्रितः ॥ ७२ ॥
षड्जन्यासस्तथारोहे वर्जितर्षभधैवतः ।
अवरोहे तु संपूर्णः समाख्यातो मनीषिभिः ॥ ७३ ॥
तथा चौडुवसंपूर्णः कोमलौ धैवतर्षभौ ।
त्रयो निषादगांधारमध्यमास्तीव्रसंज्ञकाः ॥ ७४ ॥

पूर्याधनाश्रीः ।

अथ पूर्याधनाश्रीश्च प्रथिता पंचमांशिका ।
संपूर्णा चैव ऋषभस्वरसंवादिनी मता ॥ ७५ ॥
तीव्रा मध्यमगांधारनिषादाः समुदीरिताः ।
ऋषभो धैवतश्चैव कोमलाववधीरितौ ॥ ७६ ॥
समुद्भूता पूर्विकाया धनाश्र्याश्चाभिमिश्रणात् ।
गीयते सरलारोहावरोहा सायमेव हि ॥ ७७ ॥

श्रीः ।

श्रीरागोऽतिप्रसिद्धोऽयं पंचमांशो मनोरमः ।
विलंबितलयोपेतो गंभीरप्रकृतिर्मतः ॥ ७८ ॥
पंचमर्षभयोरत्र संवादोऽपि मनोहरः ।
आरोहे वर्जितावत्र स्वरौ गांधारधैवतौ ॥ ७९ ॥
अवरोहे च संपूर्णः सायंकाले हि गीयते ।
तथा चौडुवसंपूर्णः पूर्णरक्तिप्रदायकः ॥ २८० ॥
ऋषभः कोमलस्तीव्रगांधारस्तीव्रमध्यमः ।
कोमलो धैवतस्तीव्रानिषादोऽत्र निरूपितः ॥ ८१ ॥

गौरी ।

अथ गौरीराग उक्तो ऋषभांशोऽतिसुंदरः ।
पंचमस्वरसंवादी साक्षाच्छ्रीरिव शोभते ॥ ८२ ॥
आरोहे चैव गांधारधैवतस्वरवर्जितः ।
अवरोहे तु गांधारहीन औडुवषाडवः ॥ ८३ ॥

गांधारमध्यमौ तीव्रौ निषादस्तीव्र एव हि ।
कोमलौ तु मतावत्र स्वरावृषभधैवतौ ॥ ८४ ॥
सदा मंद्रनिषादोऽत्र भवेद्रक्तिविवर्धकः ।
अवरोहे कैश्चिदुक्तः किंचित्कोमलमध्यमः ॥ ८५ ॥

दीपकः ।

अथ दीपकरागः स्यात्षड्जन्यासग्रहांशकः ।
पंचमस्वरसंवादी आरोहे वर्जितर्षभः ॥ ८६ ॥
अवरोहे निगदितो निषादस्वरवर्जितः ।
गीयते दीपसमये बुधैः षाडवषाडवः ॥ ८७ ॥
केचिदेनं तु संपूर्णं निर्दिशंति विचक्षणाः ।
केचिन्निषादहीनं च प्राहुः कल्याणमेलजम् ॥ ८८ ॥
तीव्रानिषादगांधारमध्यमा धैवतर्षभौ ।
कोमलौ कथितौ षड्जपंचमावचलौ सदा ॥ ८९ ॥
एकोनसप्ततिरिमे रागा दिवसवर्तिनः ।
कथिता लक्षणोपेता भूयात्स्युर्मंगलप्रदाः ॥ २९० ॥

---

यमनकल्याणः ।

अथो यमनकल्याणो रागः संपूर्ण उच्यते ।
प्रसिद्धो गायकै रात्र्या आरंभे गीयतेऽखिलैः ॥ ९१ ॥
गांधारांशः स्यान्निषादसंवादीसमलंकृतः ।
स्वरा निषादगांधारधैवतर्षभमध्यमाः ॥ ९२ ॥
पंचापि तीव्राः स्युः षड्जपंचमावचलौ मतौ।
कोमलो मध्यमोऽपीषत्स्पृश्यतेऽत्रावरोहणे ॥ ९३ ॥
द्रुतमध्यविलंबाख्यलयत्रयविभूषितः ।
पूर्णत्वसरलत्वाभ्यां प्रचारोऽपि निरर्गलः ॥ ९४ ॥
आलापयोग्योऽलंकारैः सर्वैर्वर्णैरलंकृतः ।
गमकानां मूर्छनानां तानानां विस्तराश्रयः ॥ ९५ ॥

शुद्धकल्याणः ।

अथात्र शुद्धकल्याणो रागः स्याद्वृषभाशकः ।
संवादिपंचमः कैश्चिद्गांधारांशो निरूपितः ॥ ९६ ॥
गांधारांशे त्वाभिमते संवादी धैवतो मतः ।
आरोहणे मध्यमेन निषादेन च वर्जितः ॥ ९७ ॥
अवरोहक्रमे चैव संपूर्णस्वर उच्यते ।
गीतश्चौडुवसंपूर्णः प्रथमप्रहरे निशि ॥ ९८ ॥
स्वरा निषादगांधारमध्यमर्षभधैवताः ।
तीव्राः पंचात्र कथिता विलोमे मृदुमः क्वचित् ॥ ९९ ॥
निषादमध्यमावत्र घर्षणेन प्रदर्शितौ ।
सुश्राव्यौ भवतश्चातिरक्तिदावरोहणे ॥ ३०० ॥

भूपाली ।

कल्याणस्य प्रभेदोऽथ भूपालीराग ईरितः ।
गांधारांशश्च संवादिधैवतेन विराजितः ॥ १ ॥
स मध्यमनिषादाभ्यां वर्ज्यारोहावरोहकः ।
औडुवो गीयते रात्र्यां प्रथमप्रहरे बुधैः ॥ २ ॥
स्यातां यद्यपि भूपालीदेशीकारौ समस्वरौ ।
तीव्रावृषभगांधारौ तीव्र एव हि धैवतः ॥ ३ ॥
ये एव देशीकारे स्युस्त एवात्र स्वरा मताः ।
तथापि वादिभेदेन तयोर्भेदः सदा मतः ॥ ४ ॥

हंमीरकल्याणः ।

अथ हंमीरकल्याणः पंचमांशोऽभिधीयते ।
केचिज्जगुर्धैवतांशं गांधारोऽस्य ग्रहस्वरः ॥ ५ ॥
संवादी ऋषभः प्रोक्तः कैश्चिद्गांधार ईरितः ।
आरोहे च निषादस्य दुर्बलत्वं समीरितम् ॥ ६ ॥
अवरोहे च गांधारस्वरो वक्र उदीरितः ।
निषादर्षभगांधारास्तीव्राः स्युर्मध्यमावुभौ ॥ ७ ॥

धैवतस्तीव्र एवात्र कथितः स्वरवेदिभिः ।
संघाते गमधानां स्यादेतद्रूपं परिस्फुटम् ॥ ८ ॥
गीयते वक्रसंपूर्णः प्रथमप्रहरे निशि ।
शुद्धकल्याणयमनकेदारैर्मिश्रितैरभूत् ।
हंमीरस्य समुत्पत्तिरिति प्राहुर्मनीषिणः ॥ ९ ॥

श्यामकल्याणः ।

श्यामकल्याणरागोऽथ षड्जन्यासग्रहांशकः ।
मध्यमस्वरसंवाद्यारोहे धैवतवर्जितः ॥ ३१० ॥
रिपयो रिमयोश्चात्र संगती रुचिरा भवेत् ।
तत्र माल्लारिकी छाया निषादेन निवार्यते ॥ ११ ॥
निषादर्षभगांधारधैवतास्तीव्रसंज्ञकाः ।
तीव्रश्च कोमलश्चैव मध्यमौ द्वावुदीरितौ ॥ १२ ॥
कोमलो मध्यमो मुख्यस्तीव्रो गौणः समीरितः ।
किंचित्प्रयुक्त आरोहे कामोद इव शोभते ॥ १३ ॥
हंमीरगौडकेदारमिश्रणादस्य संभवः ।
अयं षाडवसंपूर्णो निशाद्यप्रहरोचितः ॥ १४ ॥

कामोदः ।

अथ कामोदकल्याणः प्रसिद्धः पंचमांशकः ।
ऋषभस्वरसंवादी वक्रसंपूर्ण ईरितः ॥ १५ ॥
तीव्रमध्यम आरोहे किंचित्पंचमसंगतः ।
अवरोहे च गांधारो वक्र एव विरोचते ॥ १६ ॥
संगतिश्चात्र ऋषभपंचमस्वरयोः प्रिया ।
तत्र माल्लारिकी छाया तीव्रमेन निवार्यते ॥ १७ ॥
असत्प्रायो निषादः स्यादारोहे विदुषां मते ।
तीव्रसंज्ञाः स्युर्निषादर्षभगांधारधैवताः ॥ १८ ॥
मध्यमौ द्वौ गीयते च प्रथमप्रहरे निशि ।
गौडहंमीरसंयोगात्कथितोऽस्य समुद्भवः ॥ १९ ॥

हेमकल्याणः ।

अथात्र हेमकल्याणः षड्जांशः समुदीरितः ।
पंचमस्वरसंवादी मंद्रमध्यप्रचारकः ॥ ३२० ॥
मंद्रस्थपंचमोद्ग्राह आरोहे वर्ज्यधैवतः ।
तथा षाडवसंपूर्णो विलंबितलयोचितः ॥ २१ ॥
तीव्रावृषभगांधारौ मध्यमः कोमलाभिधः ।
निषादधैवतौ तीव्रौ पूर्वरात्रेऽभिगीयते ॥ २२ ॥
शुद्धकल्याणकामोदमिश्रणात्समभूदयम् ।
इति केचिद्वर्णयंति रागतत्वविवेचकाः ॥ २३ ॥
क्षेमकल्याणरागोऽपि क्वचिदन्यत्र वर्णितः ।
प्रसिद्ध्यभावात्तस्यात्र लक्षणं न समीरितम् ॥ २४ ॥

चंद्रकांतः ।

अथ कल्याणसंभेदश्चंद्रकांतः समीरितः ।
वर्ज्यमध्यम आरोहे संपूर्णश्चावरोहणे ॥ २५ ॥
तथाषाडवसंपूर्णो गांधारांशविराजितः ।
निषादस्वरसंवादी सर्वतीव्रस्वरात्मकः ॥ २३ ॥
अप्रसिद्धस्वरूपोऽयं गायकैः कैश्चिदुद्धृतः ।
पूर्वरात्रोचितः प्रायः शुद्धकल्याणवद्वपुः ॥ २७ ॥

नटः ।

प्रसिद्धो नटरागोऽथ प्रोच्यते मध्यमांशकः ।
संवादिषड्ज आरोहे संपूर्णस्वरभूषितः ॥ २८ ॥
अवरोहे तु गांधारधैवताभ्यां विवर्जितः ।
संपूर्णौडुव आदिष्टो द्वितीयप्रहरे निशि ॥ २९ ॥
तीव्रा ऋषभगांधारधैवताः सनिषादकाः ।
मध्यमः कोमलश्चैव स्वरा एवमुदीरिताः ॥ ३३०

छायानटः ।

अथच्छायानटो रागः कथ्यते ऋषभांशकः ।
पंचमस्वरसंवादी वक्रसंपूर्णरूपकः ॥ ३१ ॥

निषादवक्र आरोहेऽवरोहे स्याद्वक्रकः ।
तीव्रमध्यम आरोहे किंचिदत्र प्रयुज्यते ॥ ३२ ॥
पंचमर्षभयोश्चैव संगतिर्भवति प्रिया ।
पंचमादृषभे पातश्चातिरक्तिं समावहेत् ॥ ३३ ॥
निषादर्षभगांधारधैवतास्तीव्रकाः स्मृताः ।
मध्यमौ द्वौ गानमस्य प्रथमप्रहरे निशि ॥ ३४ ॥

केदारः ।

केदरराग: कथितो मध्यमांशो जनप्रियः ।
षड्जसंवादिरुचिरो मध्यमद्वयभूषितः ॥ ३५ ॥
असत्प्रायौ समारोहे गांधारऋषभाविह ।
अवरोहेत्वसत्प्रायो गांधारः समुदीरितः ॥ ३६ ॥
तथा चायं निगदितः प्राय औडुवषाडवः ।
निरंतरौ मध्यमौ द्वौ प्रयुज्येते बुधैरिह ॥ ३७ ॥
अदृष्टपूर्वं तत्प्रायो रागेषु ललितं विना ।
स्वरास्तीव्रा निरिगधास्तीव्रकोमलमध्यमौ ॥ ३८ ॥
कोमलो मध्यमो मुख्यो गौणः स्यात्तीव्रमध्यमः ।
गीयते प्रथमे यामे रात्रौ समयवेदिभिः ॥ ३९ ॥

मलुहा ।

केदारभेदो मलुहारागः स्यान्मध्यमांशकः ।
षड्जसंवादिरुचिरो मंद्रमध्यप्रचारकः ॥ ४० ॥
मंद्रस्थानस्वरैरस्य रागस्यावाप ईरितः ।
शोभतेऽपि च तत्रायं विलंबितलयान्वितः ॥ ४१ ॥
मंद्रस्थमध्यमश्चास्मिन्नतिरक्तिप्रदायकः ।
केदारलक्षणं सर्वमसुष्मिन्नतिदिश्यते ॥ ४२ ॥

चांदनिः ।

तथा चांदनिपूर्वोऽपि केदारो गीयते बुधैः ।
मध्यमांशस्तथा षड्जसंवादी रिगदुर्बलः ॥ ४३ ॥

हंमीरामिश्रितस्तीव्रमध्यमाधिक्यसंयुतः ।
किंचिन्मृदुनिषादोऽपि निश्याद्यप्रहरोचितः ॥ ४४ ॥
मलुहा चांदनिश्चापि तथा जलधरोऽपि च ।
त्रय एते चाधुनिकाः केदारस्य प्रकारकाः ॥ ४५ ॥
केदारे प्रबलाः संति षड्जमध्यमपंचमाः ।
इति प्रसिद्धं सर्वत्र तदेतेष्वपि दृश्यते ॥ ४६ ॥

पूरिया ।

मारुमेलभवो रागः पूरिया निशि संमतः ।
गांधारांशश्च संवादिनिषादो वर्ज्यपंचमः ॥ ४७ ॥
षाडवः कथितो नित्यं मंद्रमध्यप्रचारकः ।
अत्र मंद्रस्थगांधारो मंद्रावधिरुदीरितः ॥ ४८ ॥
मंद्रस्थेन निषादेन मध्यस्थर्षभसंगतिः ।
अन्या मंद्रनिषादेन मध्यमध्यमसंगतिः ॥ ४९ ॥
मंद्रस्थनिधनीनां स्यात्संहती रागदर्शिनी ।
मंद्रन्यादिस्वराभ्यासो मारूपार्थक्यदर्शकः ॥ ३५० ॥
तीव्रौ निषादगांधारौ तीव्रौ मध्यमधैवतौ ।
ऋषभः कोमलो गानं प्रथमप्रहरे निशि ॥ ५१ ॥

खमाजः ।

खमाजरागो रुचिरो गांधारांशः प्रकीर्तितः ।
निषादसंवाद्यारोहे ऋषभस्वरवर्जितः ॥ ५२ ॥
तथाषाडवसंपूर्णो द्वितीयप्रहरे निशि ।
संगतिः स्याद्धैवतकमध्यमस्वरयोः प्रिया ॥ ५३ ॥
तीव्रावृषभगांधारौ मध्यमः कोमलो मतः ।
धैवतस्तीव्र एव स्यान्निषादौ तीव्रकोमलौ ॥ ५४ ॥
द्विनिषादेषु रागेषु सामान्यो नियमः स्मृतः ।
तीव्रो निषाद आरोहेऽवरोहे कोमलो भवेत् ॥ ५५ ॥
पंचमाल्पत्वमारोहे निषादो रक्तिदो मृदुः ।
अवसानं च गांधारे वदेद्रागमिमं स्फुटम् ॥ ५६ ॥

खंबावती ।

अथ खंबावतीरागो गांधारांशो निरूपितः ।
धैवतसंवादियुतोऽवरोहे वर्जितर्षभः ॥ ५७ ॥
संपूर्णषाडवो वक्रपंचमश्चावरोहणे ।
संगतिः स्यान्मध्यमकधैवतस्वरयोः प्रिया ॥ ५८ ॥
रक्तिप्रदः सर्वथैव षड्जे पातस्तु मध्यमात् ।
तीव्रा ऋषभगांधारधैवता मध्यमो मृदुः ।
निषादौ द्वौ मतौ गानं द्वितीयप्रहरे निशि ॥ ५९ ॥

रागेश्वरी ।

अथ रागेश्वरी रागः षड्जांशः समुदीरितः ।
संवादिमध्यमो नित्यं पंचमस्वरवर्जितः ॥ ३६० ॥
संगतिः स्यान्मध्यमकधैवतस्वरयोः प्रिया ।
आरोहे वर्ज्यऋषभोऽवरोहे च गवक्रकः ॥ ६१ ॥
द्वितीयप्रहरे गेयो रात्रावौडुवषाडवः ।
तीव्रा ऋषभगांधारधैवता मध्यमो मृदुः ॥ ६२ ॥
उभावपि समादिष्टौ निषादौ तीव्रकोमलौ ।
कोमलस्तु भवेन्मुख्यस्तीव्रो गौण उदीरितः ॥ ६३ ॥

दुर्गा ।

अथ दुर्गा निगादिता गांधारांशाविभूषिता ।
निषादसंवादिनी स्यात्पंचमर्षभवर्जिता ॥ ६४ ॥
औडुवा मधयोर्नित्यं संगत्यातिमनोहरा ।
तीव्रौ धैवतगांधारौ मध्यमः कोमलस्तथा ।
निषादौ द्वौ गीयतेऽसौ रात्रौ यामे द्वितीयके ॥ ६५ ॥

तिलंगिका ।

तिलंगिकाथ कथिता गांधारांशविराजिता ।
निषादसंवादिनी च धैवतर्षभवर्जिता ॥ ६६ ॥

औडुवा संगतिस्त्वस्यां स्यात् पंचमनिषादयोः ।
गानमस्या विनिर्दिष्टं द्वितीयप्रहरे निशि ॥ ६७ ॥
गांधारस्तीव्र आख्यातो मध्यमश्चैव कोमलः ।
उभावपि निषादौ स्तस्तीव्रकोमलसंज्ञकौ ॥ ६८ ॥

झिंजूटिः ।

अथ झिंजूटिरागः स्याद्गांधारांशोऽतिसुंदरः ।
धैवतस्वरसंवादी संपूर्णः सर्वरंजकः ॥ ६९ ॥
सरलः सुगमश्चैव मंद्रमध्यप्रचारकः ।
अल्पौ निषादगांधारावारोहे समुदीरितौ ॥ ३७० ॥
तीव्रा ऋषभगांधारधैवता मध्यमो मृदुः ।
निषादौ द्वौ मृदुरपि गांधारोऽत्र क्वचिद्भवेत् ॥ ७१ ॥

पहाडी ।

पहाडीतिप्रसिद्धोऽत्र रागः षड्जांशकः स्मृतः ।
पंचमस्वरसंवादी मंद्रमध्यप्रचारकः ॥ ७२ ॥
मंद्रस्थितो धैवतोऽत्र भवेद्रक्तिप्रदायकः ॥
निषादमध्यमावल्पप्रयोगावपि दुर्बलौ ॥ ७३ ॥
निषादर्षभगांधारधैवतास्तीव्रसंज्ञकाः ।
मध्यमः कोमलो गानं सर्वकालेषु संमतम् ॥ ७४ ॥

सोरटः ।

अथ स्यात्सोरटो राग ऋषभांशावसानकः ।
धैवतस्वरसंवादी संपूर्णश्चावरोहणे ॥ ७५ ॥
आरोहणे तु गांधारधैवतस्वरवर्जितः ।
तथा चौडुवसंपूर्णो गीयतेऽर्धाङ्‌ निशीथतः ॥ ७६ ॥
मध्यमादृषभे पातो भवेद्रक्तिप्रदायकः ।
गांधारस्य प्रयोगोऽवरोहणे घर्षणान्वितः ॥ ७७ ॥
तीव्रा ऋषभगांधारधैवता मध्यमो मृदुः ।
उभावपि समाख्यातौ निषादौ तीव्रकोमलौ ॥ ७८ ॥

देसः ।

सदृशः सोरटेनाथ देसरागोऽत्र संमतः ।
ऋषभांशः समादिष्टः संवादी पंचमस्वरः ॥ ७९ ॥
समुदीरित आरोहे गांधारस्वरवर्जितः ।
अवरोहे तु संपूर्णोऽपि च वक्रर्षभो मतः ॥ ३८० ॥
तथा षाडवसंपूर्णो गीयतेऽर्वाङ्‌ निशीथतः ।
केचिद्वदंति गांधारः सोरटे नित्यवर्जितः ॥ ८१ ॥
गांधारस्य प्रवेशे तु पृथक्देसो भवेदिति ।
केचित्तु पंचमे न्यासं देसलक्षणमूचिरे ॥ ८२ ॥
कैश्चित्तु नियमभ्रष्टः सोरटो देस उच्यते ।
एवं विवादग्रस्तोऽयं देसः स्यात्सोरटस्वरैः ॥ ८३ ॥

जैजयवंती ।

अथ जैजयवंत्याख्यो रागः स्यादृषभांशकः ।
पंचमस्वरसंवादी संपूर्णः सोरटांगकः ॥ ८४ ॥
तीव्रौ निषादगांधारावारोहे समुदीरितौ ।
अवरोहे तु तावेव कोमलौ समुदीरितौ ॥ ८५ ॥
भवेदृषभसंलग्नोऽवरोहे कोमलस्तुगः ।
मंद्रस्थपंचमेनेह मध्यस्थर्षभसंगतिः ॥ ८६ ॥
धैवतर्षभकौ तीव्रौ मध्यमः कोमलस्तथा ।
गांधारौ द्वौ निषादौ द्वौ गीयतेऽर्वाङ्‌ निशीथतः ॥ ८७॥

तिलककामोदः ।

रागस्तिलककामोदः षड्जन्यासग्रहांशकः ।
पंचमस्वरसंवाद्यारोहे धैवतवर्जितः ॥ ८८ ॥
तथा षाडवसंपूर्णो रिवक्रश्चावरोहणे ।
भवेन्मंद्रनिषादापन्यासोऽत्र हृदयंगमः ॥ ८९ ॥
गांधारात्षड्जसंस्पर्शोऽधिकरक्तिप्रदायकः ।
गीयते सोरटांगेन निशायां प्रहरात्परम् ॥ ३९० ॥

तीव्रा ऋषभगांधारधैवताः कोमलश्च मः ।
उभावपि निषादौ स्तस्तीव्रकोमलसंज्ञकौ ॥ ९१ ॥

गौंडमल्लारः ।

रागोऽथ गौंडमल्लारः संपूर्णो मध्यमांशकः ।
षड्जसंवादिसंयुक्तो वर्षासु सुखदायकः ॥ ९२ ॥
आरोहे दुर्बलो निः स्यान्मध्यमर्षभसंगतिः ॥
मध्यमादृषभे पातो विशिष्टां रक्तिमावहेत् ॥ ९३ ॥
धैवतर्षभगांधारास्तीव्राः कोमलमध्यमः ।
निषादौ द्वौ मतौ गानं वर्षतौं सर्वदोचितम् ॥ ९४ ॥

शुद्धमल्लारः ।

अथात्र शुद्धमल्लारः षड्जन्यासग्रहांशकः ।
पंचमस्वरसंवादी वर्षाकाले सुखप्रदः ॥ ९५
सदावर्जितगांधारानिषादस्वर औडुवः ।
पंचमर्षभसंगत्या गेयो वर्षासु सर्वदा ॥ ९६ ॥
स्यात्कोमलो मध्यमोऽत्र तीव्रावृषभधैवतौ ।
अकालगानसंभूतं निवारयति किल्बिषम् ॥ ९६ ॥

मेघमल्लारः ।

मेघमल्लाररागोऽथ षड्जांशः षाडवः स्मृतः ।
पंचमस्वरसंवादी नित्यं गांधारवर्जितः ॥ ९८ ॥
गंभीरप्रकृतिः प्रेयान्विलंबितलयाश्रितः ।
आंदोलनं स्यादृषभे सदा रक्तिप्रदायकम् ॥ ९९ ॥
धैवतर्षभकौ तीव्रौ मध्यमः कोमलो मतः ।
उभौ निषादौ वर्षासु गीयते सर्वदैवाहि ॥ ४०० ॥

सूरमल्लारः ।

मल्लारस्यैव भेदोऽस्ति सूरमल्लार इत्यपि ।
षड्जांशकग्रहन्यासः संवदन्मध्यमस्वरः ॥ १ ॥

निर्मितः सूरदासेन मध्यमादिसरूपकः ।
सदा प्रच्छन्नगांधारधैवतश्चौडुवो मतः ॥ २ ॥
निषादमध्यमावत्र कोमलौ समुदीरितौ ।
ऋषभस्तीव्र आख्यातो वर्षर्तौ गीयते सदा ॥ ३ ॥

मीयामल्लारः ।

मीयामल्लारः प्रसिद्धस्तानसेनविनिर्मितः ।
षड्जांशकग्रहन्यासः संवादिस्वरपंचमः ॥ ४ ॥
कर्णाटकविमिश्रोऽयं संपूर्णः समुदीरितः ।
सदांदोलितगांधारो मंद्रमध्यप्रचारकः ॥ ५ ॥
निषादधैवतप्रेष्ठसंगत्या समलंकृतः ।
निषादद्वययोगोऽत्र स्वतंत्रो रक्तिदायकः ॥ ६ ॥
रुचिरा संगतिश्चान्या स्यात्पंचमनिषादयोः ।
मध्यमादृषभे पातो विलंबितलयोऽपि च ॥ ७ ॥
गांधारमध्यमावत्रकोमलौ समुदीरितौ ।
धैवतर्षभकौ तीव्रौ निषादौ तीव्रकोमलौ ॥ ८ ॥
गीयते सर्वदैवायं वर्षाकाले मनीषिभिः ।
एवं मल्लाररागस्य प्रकारा बहवो मताः ॥ ९ ॥
यथा सोरटमल्लारो देसमल्लार एव च ।
स्याद्रामदासमल्लारो नटमल्लारकस्तथा ॥ ४१० ॥
आरुणीनायकीपूर्वौ मल्लारौ समुदीरितौ ।
झांझमल्लारकश्चैव धुंडियापूर्वकस्तथा ॥ ११ ॥
एवमन्येऽपि मल्लारा रागांतरविमिश्रिताः ।
वर्षाकालेषु गीयंते वसंततौं बहारवत् ॥ १२ ॥

विहंगः ।

अथ रागो विहंगाख्यो बिहाग इति विश्रुतः ।
गांधारांशश्च संवादिनिषादस्वरशोभनः ॥ १३ ॥
आरोहे वर्जितावत्र स्वरावृषभधैवतौ ।
अवरोहे समादिष्टः संपूर्णः स्वरवेदिभिः ॥ १४ ॥

D.C.P... Poona LIBRA...

तथा चौडुवसंपूर्णो निशीथसमयाश्रितः ।
भवेन्निषादापन्यासो नूनमत्रातिरक्तिदः ॥ १५ ॥
तीव्राः स्युरत्र गांधारनिषादर्षभधैवताः ।
कोमलो मध्यमश्चेति संमतः स्वरनिर्णयः ॥ १६ ॥
तीव्रोऽपि मध्यमः कैश्चित्किंचिदत्र प्रयुज्यते ।
निषादे कोमले किंचित्प्रविष्टे तु बिहागडः ॥ १७ ॥

शंकरः ।

अथात्र शंकरो रागः षड्जांशग्रह ईरितः ।
पंचमस्वरसंवादी सदा मध्यमवर्जितः ॥ १८ ॥
षाडवश्चौडुवः कैश्चिन्मध्यमर्षभवर्जितः ।
अत्रापि च निषादापन्यासो रक्तिप्रदायकः ॥ १९ ॥
निषादर्षभगांधारधैवतास्तीव्रकाः स्वराः ।
विहंगांगेन मधुरमर्धरात्रे च गीयते ॥ ४२० ॥

काफी ।

अथो हराप्रियामेले काफीरागोऽत्र विश्रुतः ।
पंचमांशश्च संपूर्णः षड्जसंवाद्युदीरितः ॥ २१ ॥
गांधारांश इति प्राहुः केचिद्गानविशारदाः ।
तीव्रो निषाद आरोहे मनागत्र प्रयुज्यते ॥ २२ ॥
न्यासश्च पंचमे प्रोक्तो विशेषेणात्र रक्तिदः ।
शृंगाररसभूयिष्ठमेनं केचिद्विदुर्बुधाः ॥ २३ ॥
स्वरा निषादगांधारमध्यमाः कोमलाः स्मृताः ।
धैवतर्षभकौ तीव्रौ क्वचित्तीव्रो निषादकः ॥ २४ ॥

सिंधुरः ।

अथ रागः सिंधुरोऽत्र षड्जांशक उदीरितः ।
पंचमस्वरसंवाद्यारोहे गांधारवर्जितः ॥ २५ ॥
कैश्चिद्धैवतसंवादी ऋषभांशो निगद्यते ।
अयं षाडवसंपूर्णः सर्वकालेषु गीयते ॥ २६ ॥

धैवतर्षभकौ तीव्रौ मृदू गांधारमध्यमौ ।
उभावपि निषादौ स्तस्तीव्रकोमलसंज्ञकौ ॥ २७ ॥

गारा ।

गारारागोऽथ षड्जांशो मंद्रमध्यप्रचारकः ।
पंचमस्वरसंवादी संपूर्णः सार्वकालिकः ॥ २८ ॥
तीव्रौ निषादगांधारावारोहे समुदीरितौ ।
अवरोहे तु तावत्र कोमलाववधारितौ ॥ २९ ॥
मंद्रस्थमध्यमे षड्जमारोप्यामध्यमध्यमम् ।
गीयतेऽयं गायकैस्तदातिरक्तिप्रदायकम् ॥ ४३० ॥
धैवतर्षभकौ तीव्रौ मध्यमश्चात्र कोमलः ।
तीव्रकोमलगांधारौ निषादौ तीव्रकोमलौ ॥ ३१ ॥

कर्णाटः ।

अथ कर्णाटरागोऽत्र प्रसिद्धो ऋषभांशकः ।
पंचमस्वरसंवादी प्रौढालापार्ह उत्तमः ॥ ३२ ॥
अवरोहे धैवतेन हीनः संपूर्णषाडवः ।
रमणीया स्यान्निषादपंचमस्वरसंगतिः ॥ ३३ ॥
सदांदोलितगांधारो विलंबितलयाश्रितः ।
मंद्रमध्यप्रचारोऽयं गीयतेऽर्वाङ् निशीथतः ॥ ३४ ॥
कर्णाटशब्दापभ्रंशात्प्रसिद्धं नाम कानडा ।
दरबारीति यवनैर्गीतत्वाद्राजसंसदि ॥ ३५ ॥
गांधारो मध्यमश्चैव धैवतश्च निषादकः ।
कोमलाः कथितास्तीव्रो ऋषभस्त्वेक एव हि ॥ ३६ ॥

नायकी ।

अथ कर्णाटभेदोऽत्र नायकी मध्यमांशकः ।
षड्जसंवादिसंयुक्तो नित्यं धैवतवर्जितः ॥ ३७ ॥
अवरोहे च निपयोः पगयोरपि संगती ।
कर्णाटांगः षाडवोऽयं गीयते प्राङ्निशीथतः ॥ ३८ ॥

स्वरा निषादगांधारमध्यमाः कोमलास्तथा ।
ऋषभस्तीव्र इत्येवं मनीषिभिरुदीरिताः ॥ ३९ ॥

हुसेनी ।

कर्णाटभेदश्चान्योऽपि हुसेनीति प्रकीर्तितः ।
तारषड्जांशकश्चैव मध्यमग्रह एव च ॥ ४४० ॥
पंचमस्वरसंवादी यवनैः परिकल्पितः ।
नामैव ज्ञापयत्येवं तारमध्यप्रचारकः ॥ ४१ ॥
तारस्थानेऽस्य वैचित्र्यं भवेद्रक्तिप्रदायकम् ।
कर्णाटांगेन संपूर्णो गीयते प्राङ्निशीथतः ॥ ४२ ॥
गांधारो मध्यमश्चैव धैवतश्च निषादकः ।
कोमला अत्र चत्वारस्तीव्रः स्यादृषभस्वरः ॥ ४३ ॥

अड्डाणः ।

कर्णाटभेदोऽड्डाणोऽपि तारषड्जांश एव हि ।
पंचमस्वरसंवादी संपूर्णो मध्यमग्रहः ॥ ४४ ॥
यथा कर्णाटके प्रोक्ता मंद्रमध्यविचित्रता ।
तथाड्डाणे च कथिता तारमध्यविचित्रता ॥ ४५ ॥
दौर्बल्याद्धगयोरत्र छाया सारंगिकी मनाक् ।
भवेत्पंचमगांधारसंगतिस्तन्निवारिणी ॥ ४६ ॥
हुसेनीसदृशं रूपं यद्यपीदमपीक्ष्यते ।
सारंगांगप्रचुरता भवेत्तद्भेददर्शिनी ॥ ४७ ॥
धैवतस्त्वत्र तीव्रोऽपि कोमलोऽपि प्रयुज्यते ।
उभयोरपि दौर्बल्यं निश्चितं तत्त्ववेदिभिः ॥ ४८ ॥
स्वरा मध्यमगांधारनिषादाः कोमलाः स्मृताः ।
धैवतौ द्वावपि प्रोक्तावृषभस्तीव्र एव हि ॥ ४९ ॥
तारस्थानप्रधानोऽयं भवेत्तत्रैव रक्तिदः ।
गीयते तु त्रियामायास्तृतीये याम एव हि ॥ ४५० ॥

साहाना ।

कर्णाटस्यैव प्रभेदः साहाना पंचमांशकः ।
षड्जसंवादिसंयुक्त आरोहे वर्ज्यधैवतः ॥ ५१ ॥
अवरोहेऽपि च मनागेव धैवत इष्यते ।
तथा षाडवसंपूर्णो निशीथाद्गीयते परम् ॥ ५२ ॥
स्वरा निषादगांधारमध्यमाश्चैव कोमलाः ।
तीव्रर्षभो धैवतौ च भवतस्तीव्रकोमलौ ॥ ५३ ॥

कौशी ।

कर्णाटस्यापरो भेदः कौशी स्यान्मध्यमांशकः ।
षड्जसंवादिसंयुक्तः संपूर्णस्वरभूषितः ॥ ५४ ॥
संगतिर्मधयोरत्र भवेद्रक्तिप्रदायिनी ।
कर्णाटे मालकंसस्य मिश्रणात्समभूदयम् ॥ ५५ ॥
स्वरा निषादगांधारमध्यमाः कोमला उभौ ।
धैवतावृषभस्तीव्रो निशीथाद्गीयते परम् ॥ ५६ ॥

वागीश्वरी ।

अथ वागीश्वरीरागो मध्यमांश उदीरितः ।
संवादिषड्जरुचिर आरोहे वर्ज्यपंचमः ॥ ५७ ॥
तथा षाडवसंपूर्णोऽवरोहेऽप्यल्पपंचमः ।
गांधारद्वयसंयुक्तोऽप्ययं कैश्चिन्निरूपितः ॥ ५८ ॥
तीव्रो गांधार आरोहेऽवरोहे कोमलास्त्विति ।
निपुणा गायकास्तीव्रगांधारस्य लवं क्वचित् ॥ ५९ ॥
प्रच्छन्नं दर्शयंतश्च दृश्यंतेऽपि च संप्रति ।
स्वरा निषादगांधारमध्यमाः कोमलाः स्मृताः ।
धैवतर्षभकौ तीव्रौ निशीथाद्गीयते परम् ॥ ४६० ॥

बहारः ।

अथ रागो बहारः स्यात्षड्जन्यासग्रहांशकः ।
मध्यमस्वरसंवादी षाडवोऽयं समीरितः ॥ ६१ ॥

वर्जितर्षभ आरोहेऽवरोहे वर्ज्यधैवतः ।
मधसंगतिरारोहेऽवरोहे निपसंगतिः ॥ ६२ ॥
समायोगो बहारस्य नानारागेषु वर्णितः ।
यथायोगं तत्र कुर्यात्तत्तल्लक्षणनिर्णयम् ॥ ६३
स्वरा निषादगांधारमध्यमाः किल कोमलाः ।
धैवतर्षभकौ तीव्रौ वसंते गीयते सदा ॥ ६४ ॥

मालकौशिः ।

अथ रागो मालकौशिर्गंभीरो मध्यमांशकः ।
षड्जसंवादिललितो वर्जितर्षभपंचमः ॥ ६५ ॥
तथा चौडुव आलापयोग्यः सकलसंमतः ।
गीयते च निशीथिन्यां निशीथात्परमेव हि ॥ ६६ ॥
गांधारो मध्यमश्चैव धैवतश्च निषादकः ।
स्वरा अत्र समादिष्टाश्चत्वारोऽपि च कोमलाः ॥ ६७

हिंडोलः ।

अथ हिंडोलरागोऽत्र गांधारांशः प्रकीर्तितः ।
धैवतस्वरसंवादी पंचमर्षभवर्जितः ॥ ६८ ॥
औडुवश्चालापयोग्यो गंभीरश्च निसर्गतः ।
गेयो निशीथात्परतो वसंततौ सदैव हि ॥ ६९ ॥
गांधारो मध्यमश्चैव धैवतश्च निषादकः ।
तीव्रा एव समाख्याताश्चत्वारोऽपि स्वरा इह ॥ ४७०

वसंतः ।

वसंतरागः संपूर्णस्तारषड्जांशशोभनः ।
मध्यमस्वरसंवादी वसंततौ सुखप्रदः ॥ ७१ ॥
सदा मध्यमगांधाराभ्यासे रक्तिप्रदायकः ।
तेनैव परजातस्वीयां प्रदर्शयति भिन्नताम् ॥ ७२ ॥
मध्यमद्वयसंयुक्तो ललितांगमनोहरः ।
कैश्चिच्चषाडवः प्रोक्तो नित्यं पंचमवर्जितः ॥ ७३

कैश्चित्षाडवसंपूर्ण आरोहे वर्ज्यपंचमः ।
केषांचित्संमतोऽस्त्यत्र तीव्र एव हि धैवतः ॥ ७४ ॥
तीव्रौ निषादगांधारावृषभः कोमलः स्मृतः ।
मृदुतीव्रौ मध्यमौ द्वौ धैवतौ द्वौ तु पाक्षिकौ ॥ ७५ ॥

भट्टीहारः ।

अथ रागो भट्टिहारः कथितो मध्यमांशकः ।
संपूर्णः षड्जसंवादी मध्यमन्याससुंदरः ॥ ७६ ॥
वक्रावरोह आरोहे निषादो दुर्बलो मतः ।
धैवतान्मध्यमे पातो भवेद्भक्तिप्रदायकः ॥ ७७ ॥
जातः कलिंगपरजललितानां विमिश्रणात् ।
निर्मितो भर्तृहरिणेत्याहुः केचिद्विचक्षणाः ॥ ७८ ॥
अस्तु तत्संमतं मा वा रूपमेतन्मनोरमम् ।
तृतीयप्रहरे रात्र्यां गानमस्याभिसंमतम् ॥ ७९ ॥
तीव्रा निषादगांधारधैवताः कोमलर्षभः ।
उभावपि समादिष्टौ मध्यमौ तीव्रकोमलौ ॥ ४८० ॥

भंखारः ।

अथ भंखाररागः स्यात्संपूर्णः पंचमांशकः ।
षड्जसंवादरुचिरो मध्यमद्वयसंयुतः ॥ ८१ ॥
कोमलो मध्यमोऽवश्यमिष्यते भट्टिहारवत् ।
तृतीयप्रहरे रात्र्यां गानमस्यापि संमतम् ॥ ८२ ॥
तीव्रा निषादगांधारधैवताः कोमलर्षभः ।
उभावप्युचितावत्र मध्यमौ तीव्रकोमलौ ॥ ८३ ॥

पंचमः ।

अथोक्तः पंचमो रागः संपूर्णो मध्यमांशकः ।
षड्जसंवादिरुचिरो मध्यमद्वयभूषितः ॥ ८४ ॥
गीयते ललितांगेन चतुर्थप्रहरे निशि ।
सोहन्यंगान्वितं केचिज्जगुः पंचमवर्जितम् ॥ ८५ ॥

वर्जितर्षभमारोहे तथा चौडुवषाडवम् ।
केचिदौडुवमेवाहुर्वर्जितर्षभपंचमम् ॥ ८६ ॥
स्वरा निषादगांधारधैवतास्तीव्रसंज्ञकाः ।
ऋषभः कोमलश्चैव मध्यमौ तीव्रकोमलौ ॥ ८७ ॥

परजः ।

अथोक्तः परजोरागस्तारषड्जांशकः प्रियः ।
पंचमस्वरसंवादी द्विमध्यमविभूषितः ॥ ८८ ॥
संपूर्णारोहावरोहः कलिंगेनाभिमिश्रितः ।
गीयते गीतकुशलैश्चतुर्थप्रहरे निशि ॥ ८९ ॥
तीव्रौ निषादगांधारौ कोमलौ धैवतर्षभौ ।
उभौ निगदितावत्र मध्यमौ तीव्रकोमलौ ॥ ४९० ॥

सोहनी ।

अथोक्तः सोहनीरागो धैवतांशमनोहरः ।
गांधारसंवादियुतो नित्यं वर्जितपंचमः ॥ ९१ ॥
षाडवः प्रियगांधारधैवतस्वरसंगतिः ।
क्वचिदेव प्रयुक्तोऽस्मिन्दृश्यते मृदुमध्यमः ॥ ९२ ॥
तीव्रा निषादगांधारधैवताः कोमलर्षभः ।
मध्यमौ द्वावपि निशि गीयते प्रहरेंऽतिमे ॥ ९३ ॥

कालिंगः ।

अथ रागः कलिंगोऽत्र गांधारांश उदीरितः ।
धैवतस्वरसंवादी संपूर्णः सरलोऽपि च ॥ ९४ ॥
ह्रस्वत्वाद्द्रिधयोरत्र भैरवाद्भिन्नरूपता ।
प्रशस्तं गानमेतस्य निशायां प्रहरेंऽतिमे ॥ ९५ ॥
स्वरास्त्रयः कोमलाः स्युर्धैवतर्षभमध्यमाः ।
तथा निषादगांधारौ तीव्रावत्र समीरितौ ॥ ९६ ॥

ललितपंचमः ।

अथ रागोऽत्र ललितपंचमो मध्यमांशकः ।
षड्जसंवादिसंयुक्तो मध्यमद्वयमंडितः ॥ ९७ ॥

आरोहे पंचमो वर्ज्यः पूर्णवक्रावरोहकः ।
तथा षाडवसंपूर्णो ललितांगमनोहरः ॥ ९८ ॥
तीव्रौ निषादगांधारौ कोमलौ धैवतर्षभौ ।
मध्यमौ द्वावपि निशि गीयते प्रहरेंऽतिमे ॥ ९९ ॥

मेघरंजनी ।

अथ रागो मध्यमांशो नामतो मेघरंजनी ।
संवादीषड्जरुचिरो वर्ज्यपंचमधैवतः ॥ ५०० ॥
नित्यमौडुव एवायं ललितांगविभूषितः ।
तीव्रस्य मध्यमस्यात्र प्रयोगः क्किंचिदिष्यते ॥ १ ॥
तीव्रौ निषादगांधारावृषभः कोमलः स्मृतः ।
मध्यमौ द्वौ निशायां च गीयते प्रहरेंऽतिमे ॥ २ ॥

ललितः ।

अथांत्यरागो ललितः षाडवो मध्यमांशकः ।
षड्जसंवादिरुचिरो नित्यं पंचमवर्जितः ॥ ३ ॥
उक्तौ द्वौ मध्यमावत्र वादी कोमलमध्यमः ।
संगतिर्मधयोरेव सदा रक्तिप्रदायिनी ॥ ४ ॥
तीव्रधैवतगांधारनिषादः कोमलर्षभः ।
द्विमध्यमो निशांतेऽसौ गीयते मंगलप्रदः ॥ ५ ॥
सचतुर्विंशतिशतमेवं रागाः प्रकीर्तिताः।
अहोरात्रगताः सर्वे स्वस्वलक्षणलक्षिताः ॥ ६ ॥
एवमन्येऽपि बहवो रागा ग्रंथेषु वर्णिताः ।
तथालोकप्रचारेऽपि रागांतरविमिश्रिताः ॥ ७ ॥
पंडितैर्बहुभिश्चान्ये नूत्ना एव प्रकल्पिताः ।
ते सर्वे संमता एव निजलक्षणसंयुताः ॥ ८ ॥
न रागाणां न तालानामंतः कुत्रापि विद्यते ।
नभःपतत्त्रिन्यायेन सर्वैर्गेयं यथामति ॥ ९ ॥

---

पूर्वाचार्यैश्च रागाणां गानकालो विनिश्चितः ।
नियमं तमनुलंघ्य गातव्यं सर्वदा बुधैः ॥ ५१० ॥

स्वस्वोक्तकाल एवैते रागा गेया यथायथम् ।
राजाज्ञया सदा गेया न तु कालं विचारयेत् ॥ ११ ॥
दशदंडोत्तरं रात्र्यां कालदोषो न विद्यते ।
यस्मिन्देशे यथाचारस्तथा गेयं विचक्षणैः ॥ १२ ॥
हिंदुस्थानिमते रागस्वरतत्वप्रकाशकः ।
लक्ष्यानुसारी प्रत्यग्रः प्राविरासीत्सुधाकरः ॥ १३ ॥
श्रीवैद्यनाथविलसत्परळीक्षेत्रवासिना ।
श्रीराजारामतनयरामशास्त्रितनूभुवा ॥ १४ ॥
अपातुलस्युपाख्येन काशीनाथेन निर्मितः ।
रामप्रसादाज्जयतु श्रीसंगीतसुधाकरः ॥ १५ ॥
शालिवाहशके षट्र्त्र्यष्टैकआनंदवत्सरे ।
मधुशुक्लप्रातिपदि संपूर्णश्चिरमेधताम् ॥ १६ ॥
विदंति सर्वं विद्वांसस्तदर्थं न कृतो मया ।
परिश्रमः किंतु मुग्धा रागतत्वबुभुत्सवः ॥ १७ ॥
संप्रति प्रचरद्रागतत्वं जानीयुरंजसा ।
इति मे सफलो भूयादस्मिन्ग्रंथे मनोरथः ॥ १८ ॥
ग्रंथेऽस्मिन्यदशुद्धं स्याद्विद्वांसः शोधयंतु तत् ।
तेषां तमुपकारं हि शिरसा धारयाम्यहम् ॥ १९ ॥
अनेन प्रियतां देवो भगवान्जानकीपतिः ।
श्रीरामचंद्रः सर्वांतःसाक्षी कारुणिकः परः ॥ ५२० ॥
हनुमते नमस्तस्मै स्वभक्ताभीष्टकारिणे ।
बुद्धिं बलं यशो धैर्यं स्मृतमात्रो ददाति यः ॥ २१ ॥
रामाय रामभद्राय रामचंद्राय साक्षिणे ।
रघुवीराय धीराय जानकीपतये नमः ॥ ५२२ ॥

॥ इतिश्रीसंगीतसुधाकरः संपूर्णः ॥

॥ श्रीसत्सीतारामचंद्रचरणारविंदार्पणमस्तु ॥ शुभम् ॥

समाप्तम् ।

# सूची.


| अ | पृ. |
|---|---|
| अंगदोऽलंकारः ... | ...९ |
| अड्डाणः ... | ...५९ |
| अन्तरगांधारः ... | ... ५ |
| अनभ्यासः ... | ...१५ |
| अनाहतनादः ... | ... २ |
| अनुवादीस्वरः ... | ... ५ |
| अपन्यासस्वरः ... | ...१६ |
| अभ्यासः ... | ...१५ |
| अलंकारः ... | ... ८ |
| अलंकारनामानि | ... ८ |
| अलंघनम् ... | ...१५ |
| अल्पता ... | ...१५ |
| अल्हैया ... | ...२३ |
| अवरोहीवर्णः ... | ... ८ |
| अविकृतस्वरः ... | ... ३ |
| अविदारिकः ... | ...२२ |
| अंशस्वरः ... | ... ५ |
| अहीरीरागः ... | ...२१ |
| **आ** | |
| आनंदभैरवः ... | ...१९ |
| आरोहीवर्णः ... | ... ८ |
| आलापः ... | ...१२ |
| आसावरी ... | ...२८ |
| आहतनादः ... | ... ३ |
| **औ** | |
| औडुवरागः ... | ...१६ |

| क | पृ. |
|---|---|
| ककुभः ... | ...२५ |
| कंकणोऽलंकारः ... | ... ९ |
| कर्णाटः ... | ...५१ |
| कर्णाटकगानम् ... | ... २ |
| कलिंगः ... | ...५६ |
| काकलीनिषादः ... | ... ५ |
| कार्फी ... | ...५० |
| कामोदः ... | ...४१ |
| कुंडलोऽलंकारः ... | ... ८ |
| केदारः ... | ...४३ |
| कैशिकनिषादः ... | ... ६ |
| कैशिकपंचमः ... | ... ५ |
| कोमलस्वराः ... | ... ४ |
| कौशिः ... | ...५३ |
| **ख** | |
| खटः ... ... | ...२९ |
| खंबावती ... | ...४५ |
| खमाजः ... | ...४४ |
| **ग** | |
| गमकः ... | ...११ |
| गमकनामानि ... | ...११ |
| गांधारग्रामः ... | ... ६ |
| गानप्रशस्तिः ... | ... १ |
| गारा ... ... | ...५१ |
| गीतिनामानि ... | ...११ |
| गुणकली ... | ...२० |
| गुर्जरी ... ... | ...२६ |

पृ.

गौडसारंगः ... ...३१

गौडमल्लारः ... ...४८

गौरी ... ... ...३८

ग्रहस्वरः ... ... ...१५

**च**

चतुर्दंडिप्रकाशिकास्वराः ... ४

चन्द्रकांतः ... ...४२

चांदनीकेदारः ... ...४३

**छ**

छायानटः ... ...४२

**ज**

जातिनामानि ... ...१०

जीवस्वरः ... ... ५

जैजयवंती ... ...४७

जैत्रः ... ...३५

जैत्रश्रीः ... ...३८

जौनपुरी ... ...२८

**झ**

झिंजूटिः ... ...४६

**ट**

टंकी ... ...३६

**त**

ताटंकोऽलंकारः ... ... ९

तारस्वरः ... ... ३

तिलककामोदः ... ...४७

तिलंगिका ... ...४५

तीव्रस्वराः ... ... ४

तोडी ... ...२६

त्रिवेणी ... ...३६

**द**

दीपणः ... ...३९

पृ.

दुर्गा ... ...४५

दुर्गायकः ... ...१३

देवगांधारः ... ...२८

देवगिरिः ... ...२३

देशाख्यः ... ....२१

देशिकारः ... ...२४

देशीगानम् ... ... २

देसः ... ...४७

देसी ... ...२८

**ध**

धनाश्रीः ... ...३२

धानी ... ...३३

**न**

नटः ... ...४२

नटवेलावली ... ...२३

नादः ... ... २

नायकी ... ...५१

नूपुरोऽलंकारः ... ... ९

न्यासस्वरः ... ...१६

**प**

पंचमः ... ...५५

पंचश्रुतिधैवतः ... ... ४

पंचश्रुतिरिः ... ... ४

पटमंजरी ... ...३२

परजः ... ...५६

पहाडी ... ...४६

पारिजातस्वरसंख्या ... ... ४

पीलुः ... ...३४

पूर्वी ... ...३६

पूरिया ... ...४४

पूर्याधनाश्रीः ... ...३८

| | | पृ. |
|---|---|---|
| प्रतिमध्यमः | ... | ... ५ |
| प्रभातः | ... | |

ब

| | | |
|---|---|---|
| बंगालभैरवः | ... | |
| बडहंसः | ... | |
| बर्वा | ... | |
| बहारः | ... | |
| बहुत्वम् | ... | |
| बिभासः | ... | |

भ

| | | |
|---|---|---|
| भंखारः | ... | ...५५ |
| भंजकः | ... | ...१२ |
| भटिहारः | ... | ...५५ |
| भीमपलासी | ... | ...३२ |
| भूपालः | ... | ...२६ |
| भूपाली | ... | ...४० |
| भैरवः | ... | ...१८ |
| भैरवी | ... | ...२५ |

म

| | | |
|---|---|---|
| मध्यमग्रामः | ... | ... ६ |
| मध्यमादिः | ... | ...३० |
| मध्यस्वरः | ... | ... ३ |
| मंद्रस्वरः | ... | ... ३ |
| मलुहा | ... | ...४३ |
| माडः | | |
| मार्गगीतम् | | |
| मारुः | | |
| मालकौशि | | |
| मालवश्री | | |
| मा | | |

| | | | पृ. |
|---|---|---|---|
| मीयामल्हारः | | ... | ...४९ |
| मीयासारंगः | | ... | ...३१ |
| मूर्छना | | ... | ... ६ |
| मूर्छनानामानि | | ... | ... ६ |
| मूलतानी | | ... | ...६६ |
| मृदुपंचमः | ... | ... | ... ५ |
| मृदुषड्जः | ... | ... | ... ५ |
| मेघमल्हारः | ... | ... | ...४८ |
| मेघरंजनी | | | ...५७ |
| मौक्तिकोऽलंकारः | | ... | ... ८ |

य

| | | | |
|---|---|---|---|
| यमनकल्याणः | | ... | ...३९ |
| यमनवेलावली | | ... | ...२२ |
| योगिनी | ... | ... | ...२१ |

र

| | | | |
|---|---|---|---|
| रत्नालंकारः... | | ... | ...१० |
| रत्नाकरस्वरसंख्या | | ... | ... ४ |
| रागः | ... | ... | ...१५ |
| रागकालनिर्णयः | | ... | ... |
| रागविबोधस्वरसंख्या | | ... | ... ४ |
| रागस्थापना... | | ... | ...१२ |
| रागालापः | ... | ... | ...१२ |
| रागेश्वरी | ... | ... | ...४५ |
| ी | ... | | ...२० |
| | ... | ... | ...१२ |
| | ... | ... | ...३७ |

ल.

| | | | |
|---|---|---|---|
| नम् | ... | ... | ...१५ |
| लच्छासागः... | | ... | ...२४ |
| ललितः | ... | ... | ...५७ |
| ललितपंचमः | | ... | ...५६ |
| लाचारीतोडी... | | ... | ...१७ |

| | पृ. |
|---|---|
| लीलांवरी ... ... | ...३३ |
| **व.** | |
| वर्णः ... ... | ... ८ |
| वराटी ... ... | ...३५ |
| वराळीमध्यमः ... | ... ५ |
| वसंतः ... ... | ...५४ |
| वागीश्वरी ... ... | ...५३ |
| वादीस्वरः ... ... | ... ५ |
| विकृतस्वरः ... ... | ... ३ |
| विन्यासस्वरः... ... | ...१६ |
| विवादीस्वरः ... | ... ५ |
| विहंगः ... ... | ...४१ |
| वृंदावनीसारंगः ... | ...३० |
| वेलावली ... ... | ...१२ |
| **श** | |
| शंकरः ... ... | ...५० |
| शारीरम् ... ... | ...१४ |
| शिवभैरवः ... ... | ...१९ |
| शुद्धवेलावली ... | ...२२ |
| शुद्धकल्याणः... ... | ...४० |
| शुद्धमल्लारः ... ... | ...४८ |
| शुद्धसामंतः ... ... | ...२८ |
| शुद्धसारंगः ... ... | ...३० |
| शुद्धस्वराः ... ... | ... ३ |
| श्यामकल्याणः ... | [illegible] |
| श्रीः ... ... | [illegible] |
| श्रुतिनामानि ... | [illegible] |
| **ष** | |
| षट्श्रुतिधैवतः ... ... | [illegible] |
| षट्श्रुतिऋषभः ... ... | ... ५ |
| षड्जग्रामः ... ... | ... ६ |
| षट्स्वरः ... ... | ... ३ |
| षाडवरागः ... ... | ...१६ |
| संगीतम् ... ... | ... १ |

| | पृ. |
|---|---|
| **स** | |
| [illegible] ... | ... ८ |
| [illegible] ... | ...२४ |
| [illegible] ... | ...१६ |
| [illegible] ... | ...१६ |
| [illegible] ... | ... ५ |
| [illegible] ... | ...५३ |
| [illegible] ... | ...३७ |
| [illegible] ... | ... ५ |
| तारामृतस्वराः ... | ... ४ |
| सिंधभैरवी ... ... | ...२५ |
| सिंधुरः ... ... | ...५० |
| सुघराई ... ... | ...३० |
| सुनायकः ... ... | ...१२ |
| सूहा ... ... | ...२१ |
| सूरमल्लारः ... ... | ...४८ |
| सुवर्णोऽलंकारः ... | ... ८ |
| सोरटः ... ... | ...२६ |
| सोहनी ... ... | ...५६ |
| सौराष्ट्रभैरवः... ... | ...२४ |
| स्थायीवर्णः ... ... | ... ८ |
| स्वराः ... ... | ... ३ |
| स्वरनामानि ... ... | ... २ |
| स्वरप्रस्तारः ... ... | ... ७ |
| स्वरमेलकलानिधिस्वराः... | ... ४ |
| **ह** | |
| [illegible] ... | ...४७ |
| [illegible] ... | ...३१ |
| [illegible] ... | ...३१ |
| [illegible] ... | [illegible] |
| [illegible] ... | ...४४ |
| [illegible] ... | [illegible] |
| [illegible] ... | ...४४ |
| [illegible] ... | ...३८ |